CC-0. In Public Domain. Digitization by eGangotri

Almira 2
Shelf 2
27

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ढ: सं० १३६६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द. न. १६८८८

ग्र० २५१

॥ अथ सटीकजातकालंकारः प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जनकराज १८५८।

श्रीगणेशायनमः ॥ वस्वर्णब्रह्मविद्यापरिचयचतुरंश्रीशुकंव्यासपुत्रं नत्वाचार्यंमुनीनांहरिपदकमलेप्रेमविश्रामभाजाम् ॥
स्विष्टेष्टंस्वेष्टदेवंश्रुतिसमधिगतंमाधवंभावयित्वा भावैरुद्भाव्यतेऽस्मैप्रवरमतिमुदेजातकालंकृतश्रीः ॥ १ ॥ अथज्योति
र्वित्तिलकश्छंदोलंकृतिकाव्यरचनानिपुणःश्रीगणेशकविः श्रीशुकजातकानुरोधिजातकालंकारनामकग्रंथंचिकीर्षुस्तदा-
दौनिर्विघ्नपरिसमाप्त्यर्थंशिष्टाचारक्रमगतंभगवद्विभूतिभूतगुरुगणेशभारतीकर्मप्रणिपातपरंविष्णुनिर्देशात्मकंमंगलमाचरति

सानंदंप्रणिपत्यसिद्धिसदनंलंबोदरंभारतींसूर्यादिग्रहमंडलंनिजगु
रुंभक्त्याहृदब्जेस्थितम् ॥ एषामंघ्रिसरोरुहस्मरणतोनानाविधाः
सिद्धयःसिद्धिंयांतिलघुप्रयांतिविलयंप्रत्यूहशैलव्रजाः ॥ १ ॥

द्वाभ्यांशार्दूलविक्रीडिताभ्यां सानंदमिति सद्भावाकलितमिति गणेशकृतिनागणेशनाम्नाग्रंथकरणकुशलेनमयातज्जात-
कंवृत्तस्रग्धरयाप्रव्यक्तंक्रियतेस्पष्टार्थंयथास्यात्तथाविधीयतइत्यर्थः किंकृत्वा भक्त्यातान्सिद्धिसदनान्नत्वानमस्कृत्यता-
न्किंविधान् येषामंघ्रिसरोरुहस्मरणतः नानाविधाः अनेकविधाः सिद्धयः कार्यसिद्धयः सिद्धिंपूर्णतांयांति प्रत्यूहशैलव्र
जाः विघ्नपर्वतसमूहाः विघ्नोंतरायःप्रत्यूहइत्यमरः व्रजोगोष्ठाध्ववृंदेष्वित्यमरः लघुशीघ्रंविलयंयांतिनश्यंति लघुक्षिप्रम

CC-0. In Public Domain. Digitization by eGangotri

रंकृतमित्यमरः लघ्विति पदं शीघ्रतावाचकं देहलीदीपकन्यायेनोभयत्रान्वेति तान्कान्तदाह सिद्धिसदनं सिद्धिर्लक्ष्मीः व
स्याः सदनं गृहं निवासस्थानमितियावत् श्रीनिवासमित्यर्थः त्वं सिद्धिस्त्वं स्वधा स्वाहेत्यादिलक्ष्मीस्तुत्यारंभे सिद्धिशब्दस्य
लक्ष्म्यां प्रयुक्तत्वात् सिद्धिर्लक्ष्मीरिति नित्यविकल्पोर्थः कीदृशं सिद्धिसदनं सानंदं आनंदेन सहितं ब्रह्मण आनंदः आनं
दं ब्रह्मणो विद्वानिति श्रुतेः सानंदमिति विशेषणपदं भगवतोन्यत्र नोपपद्यते ततोन्यदार्त्तमिति श्रुत्वा ब्रह्माणमित्यत्रार्तवोपदेशा-
द्धृदब्जे स्थितं हृदयकमलवासिनं सर्वस्य चाहं हृदि सन्निविष्ट इति भगवद्वचनात् भक्त्या प्रीतिपूर्वकानुस्मृत्या गुरुं श्रीमच्छिवा
ख्यं लंबोदरं विनायकं भारतीं सरस्वतीं सूर्यादिग्रहमंडलं रव्यादीनां ग्रहाणां मंडलं समूहं च प्रणिपत्य नमस्कृत्य शुकास्यगलि
तं शुकमुनिमुखाद्भक्तिभूतं गलितं गाथोक्तिगाथानां श्लोकविधुराणां गिरां उक्तिर्व्यवहारो यस्मिन् तथाभूतं कथं व्यक्तं क्रियते तथा
शुकास्याद्गलितं श्रीमद्भागवतं महापुराणं श्रीधरस्वामिना व्यक्तं कृतमित्यध्याहारः कथंभूतं भागवतं जातकं च सद्भा-
वाकलितं सत् प्रशस्तो भावो विष्णुभक्तिस्तेनाकलितं विशिष्टं जातकपक्षे सद्भावैस्तन्वादिद्वादशभावैस्तात्पर्यैर्वा विशिष्टं पदार्थल
लितं पदार्थैः परमभक्तिद्योतकैः श्रवणकीर्तनादिभिर्ललितं रुचिरं जातकपक्षे पदार्थैः सानंदसदनादिभिर्मनोहरं योगांग
लीलार्चितं योगो भक्तियोगस्तस्यांगानि नियमासनप्राणायामध्यानधारणासमाधयः तेषां लीला उपदेशविशेषास्ताभिरर्चितं
महितं जातकपक्षे योगांगानि ग्रहभावादीनि तेषां लीला योग्यत्वेन घटनविशेषास्ताभिः महितं प्रशस्तमित्यर्थः ज्योतिर्विदां जी

CC-0. In Public Domain. Digitization by eGangotri

वनंज्योतिःपरमात्मानारायणः परोज्योतिरितिश्रुतेः तद्विदांब्रह्मविदांजीवनंकालक्षेपयोग्यं जावकपक्षे ज्योतिर्विदांगणकानांजीविकाप्रदत्वाज्जीवनमित्यर्थः वृत्तस्रग्धरयास्रग्धरावृत्तैरित्यर्थः जात्यभिप्रायेणैकवचनोक्तिः तस्यलक्षणंचत्वारोयत्रवर्णाःप्रथममित्यादि ॥ १ ॥ २ ॥ ननुश्रीधरस्वामिवद्भवतापिशुकजातकव्याख्यानेकर्तव्यग्रंथारंभोनोचित

सद्भावाकलितंपदार्थललितंयोगांगलीलार्चितंश्रीमद्भागवतंशुकास्यगलितंयच्छ्रीधरस्वामिना ॥ सुव्यक्तंक्रियतेगणेशकविनागाथोक्तितज्जातकंवृत्तस्रग्धरयाजनादिसुफलंज्योतिर्विदांजीवनम् ॥ २ ॥ यत्पूर्वंपरमंशुकास्यगलितंसज्जातकंफक्किकारूपंगूढतमंतदेवविशदंकुर्वेगणेशोस्म्यहम् ॥ दैवज्ञःसुतरांयशःसुखमतिःश्रीहर्षदंस्रग्धरावृत्तैश्चारुनृणांशुभायनपदंश्रीमच्छिवानुज्ञया ॥ ३ ॥

स्तत्राह यत्पूर्वमिति गणेशनामाहंश्रीमच्छिवानुज्ञयावेदशास्त्रसंपन्नशिवनाम्नोगुरोराज्ञयातत्प्रीत्यर्थमितिभावः पूर्वंभावकाले शुकास्यगलितंछंदोरहितत्वात्स्वरूपंगूढतमं अतिशयेनगहनंनतुविशदं परमंसारार्थनिरूपणेनोत्कृष्टंयज्जातकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेवस्रग्धरावृत्तैश्चारुरुचिरंविशदंकुर्वे फक्किकारूपस्यगूढतमस्यविशदीकरणंश्लोकैरेवोचितमित्याशयः कथंभूतोगणेशः दैवज्ञोऽदृष्टवेत्ता कर्त्तव्यग्रंथभावितवार्तादर्शीनिगूढभावः सुतरांयशः सुखमतिः अतिशयितकीर्तिजन्यसुखेमतिर्यस्यसः प्रयोजनगर्भमिदंविशेषणं यशोऽन्यसुखार्थमितिभावः कीदृशंतत् श्रीहर्षदं श्रियंहर्षंचददातितत्शुभायनपदं शुभायना नांशुभजातकानां आनंदसिद्धिसदनादीनां आस्पदंस्थानम् ॥ ३ ॥ ननुसत्कवीनांहर्षप्रदंत्वदीयंजातकंनस्यादित्याह

भूयांसःसंतिभूमौनिजपरमधियाशालिनःकाव्यगुंफेसंख्यावंतस्तथापिप्र
चुरपरगुणानंदलीलांभजंते ॥ चंचद्गांभीर्यपद्माविबुधविटपिनांजन्मसं
प्राप्तिनूनंमर्यादांनस्वकीयांत्यजतिकिलमहात्रलधामासरस्वान् ॥ ४ ॥

भूयांसइति भूयोयद्यपिकाव्यगुंफे गद्यपद्यरचनायांनिजमतिरचनाशालिनः निजधियायाकाव्यरचनातयाशालंतेवे भूयांसः निपुणाः संख्यावंतः कवयःसंति तथापिप्रचुरपरगुणानंदलीलांभजंते प्रकृष्टपरगुणानुभवजन्यानंदली लामुद्वहंति नोपेक्षंतइत्यर्थः परगुणपरमाणून्पर्वतीकृत्यनित्यंनिजहृदिविकसंतःसंतिसंतःकियंतइत्युक्तत्वात्कृत्यानुप रगुणानुभवजन्यप्रमोदएवतेषांलीलेतिभावः उक्तमर्थमर्थांतरन्यासेनद्रढयति चंचद्गांभीर्यंचपद्माचविबुधविटपीचचंच

द्रांभीर्यपद्माविबुधविटपिनः चंचंतोद्योतमानाः गांभीर्यादयश्चएतेषांजन्मसंप्राप्तिः आश्रयोपिरत्नधामापिरत्नगृहमपिसर स्वान्समुद्रः स्वकीयांमर्यादांस्थितिंनत्यजति तथैवकवयोपिप्रमोदेरन्विति भावः गांभीर्यंनिश्चलता पद्मालक्ष्मीः विबुधवि टपीपारिजातः अत्ररत्नधामेतिपदंचिंत्यं धामशब्दस्यनपुंसकलिंगत्वात् अत्रतत्पुरुषसमासेपरवल्लिंगंद्वंद्वतत्पुरुषयोरि त्यनुशासनेनरत्नधामेति नपुंसकांतत्वंस्यादंतत्वात् अतोरत्नधामाप्युदन्वानितिपाठःसमीचीनः ॥ ४ ॥ अथ

देहंद्रव्यपराक्रमौसुखसुतौशत्रुःकलत्रंमृतिर्भाग्यंराज्यपदंक्रमेणगदि
ताळाभव्ययौलग्नतः ॥ भावाद्वादशतत्रसौख्यशरणंदेहंमतंदे
हिनांतस्माद्देवशुभाशुभाख्यफलजःकार्योबुधैर्निर्णयः ॥ ५ ॥

तन्वादीनांसामान्यविशेषसंज्ञाःकथयतेयावदध्यायं आदौतावल्लग्नादीनांदेहादिसंज्ञाः तेषांसर्वेषांभावसंज्ञांचशार्दूल विक्रीडितेनाह देहंद्रव्यपराक्रमाविति लग्नतः ल्यब्लोपेपंचमी लग्नमारभ्यक्रमेणदेहादयोद्वादशभावाः गदिताउक्ता स्तत्रलग्नंदेहोदेहभावः द्वितीयतृतीयौद्रव्यपराक्रमौद्रव्यपराक्रमभावौ चतुर्थपंचमौभावौसुखसुतौ षष्ठःशत्रुः सप्तमभावः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलत्रं अष्टमोमृतिः नवमोभाग्यः दशमंराज्यपदं एकादशद्वादशौलाभव्ययौलाभव्ययनामकौ तत्रतेषुदेहिनांदेहंसौख्यंशरणंसुखाश्रयंमतं अतोबुधैः ज्योतिर्विद्भिस्तस्माद्देहादेवलग्नभावादेवशुभाशुभाख्यफलजोनिर्णयोवक्ष्यमाणप्रकारेणकार्यः ॥ ५ ॥ लग्नमिति लग्नंमूर्त्यादिशब्दवाच्यमितिमुनयऊचुरितितृतीयेनान्वयः मूर्तिःअंगंतनुरुदयवपुःकल्पमितिसमाहारः उदयःवपुःकल्पमाद्यं तन्वादयोलग्नपर्यायाः इतिप्रथमभावः ॥ ततोनंतरंधनंस्वकोशार्थाख्यंकोशश्चार्थश्चकोशार्थौआ-

लग्नंमूर्तिस्तथांगंतनुरुदयवपुःकल्पमाद्यंततःस्वंकोशार्थाख्यंकुटुंबंधनमथ
सहजंभ्रातृदुश्चिक्यसंज्ञम् ॥ अंबापातालतुर्यंहिबुकगृहसुहृद्वाहनंयान
संज्ञंबंध्वाख्यंचांबुनीरंजलमथतनयंबुद्धिविद्यात्मजाख्यम् ॥ ६ ॥

ख्यायस्यसतथातंधनंस्वादिसंज्ञमूचुरित्यन्वयः एवमग्रेपि सहजंभ्रातृदुश्चिक्यसंज्ञंतृतीयभावः अंबापातालतुर्यंहिबुकगृहसुहृद्वाहनंयानसंज्ञंयाननामकं एवंबंध्वाख्यंबंधुसंज्ञंअंबुनीरंजलंएतेचतुर्थभावस्यपर्यायाइतिभावः अथतनयंबुद्धिविद्यात्मजाख्यं वाक्स्थानंपंचमभावस्यैतेपर्यायाः ॥ ६ ॥

वाक्स्थानमिति अथषष्ठंरिपुद्वेषवैरिक्षताख्यमूचुः रिपुद्वेषवैरिक्षतनामकमित्यर्थः अथसप्तमंजामित्रमस्तंस्मरमदनमद्यून कामाभिधानमूचुः सप्तमंजामित्रास्तस्मरमदनादिनामकमित्यर्थः अथाष्टमंरंध्रायुश्छिद्रनिधनलयपदंमृत्युं अष्टमंरंध्रादिनामकमित्यूचुःअतोनवममिहशास्त्रेगुर्वाख्यंधर्मसंज्ञंशुभतपोमार्गसंज्ञमूचुः ॥ ७ ॥ तातेतिअथतनोर्दशमंतातादिनामकमूचुरिति

वाक्स्थानंपंचमंस्यात्तनुजमथरिपुद्वेषवैरिक्षताख्यंषष्ठंजामित्रमस्तंस्मरमदनमद्यूनकामाभिधानम् ॥ रंध्रायुश्छिद्रयाम्यंनिधनलयपदंचाष्टमंमृत्युरन्यद्गुर्वाख्यंधर्मसंज्ञंनवममिहशुभंस्यात्तपोमार्गसंज्ञम् ॥ ७ ॥ ताताज्ञामानकर्मास्पदगगननभोव्योममेषूरणाख्यंमध्यंव्यापारमूचुर्दशममथभवंचागमंप्राप्तिमायम् ॥ इत्थंप्रांत्यांतिमाख्यंमुनयइहततोद्वादशंरिःफमाहुर्यद्बुद्धाप्रवीणैर्यदधिकममुतःसंज्ञयातस्यतच्च ॥ ८ ॥

आज्ञामानंकर्म आस्पदंगगनंनभोव्योममेषूरणंमध्यमंव्यापारमूचुरितिस्फुटाव्यक्तिः अथभवंएकादशं आगमंप्राप्तिं आयमूचुः इत्थमुक्तं ततोद्वादशंप्रांत्यांतिमाख्यं प्रांत्यनामकं अंतिमंरिःफंचाहुः यदमुतः प्रोक्तात्पर्यायसमुदायादधिकं

दृश्येत् तस्यतस्ययन्नामोक्तंनामसंज्ञायांपर्यायंबुद्ध्वातत्तुल्यार्थंशुद्धंग्राह्यं यथावित्तशब्देनतुल्यार्थेधनं सहोत्थेनसहजभा
वोग्राह्यइति ॥ ८ ॥ आद्यमिति इहशास्त्रेबुधैः आद्यंचतुर्थंसप्तमंदशमंकेंद्रमुक्तं परतःकंटकाख्यंचतुष्टयंचस्यात्
चतुष्टयमेवचातुष्टयं पंचमंनवमंत्रिकोणमुक्तं मृत्युलाभात्मजार्थं अष्टममेकादशपंचमंद्वितीयंपणफरमुक्तं नवमंद्वादशंष

आद्यंतुर्यंकलत्रंदशममिहबुधैःकेंद्रमुक्तंत्रिकोणंपुत्रंधर्माख्यमुक्तंपणफरमुदितंमृत्युलाभात्मजा
र्थम् ॥ धर्मंचापोक्लिमाख्यंव्ययरिपुसहजंकंटकाख्यंहिकेंद्रंचैतच्चातुष्टयंस्यात्रिकमिहगदितं
वैरिरिःफांतकाख्यम् ॥ ९ ॥ चंद्रेज्यक्षितिजारवींदुतनयौगुर्विंदुसूर्याःक्रमाच्छुक्राकौरविचंद्र
भूमितनयाज्ञार्कीसितज्ञौमताः ॥ अर्कादेःसुहृदःसमाअथबुधःसर्वेहिशुक्रार्कजौभौमाचार्ययमा
यमःकुजगुरूपूज्यःपरेवैरिणः ॥ १० ॥

ष्ठंसहजं आपोक्लिमसंज्ञमुदितं वैरिरिःफाष्टमाख्यं षष्ठद्वादशाष्टमंत्रिकमुक्तम् ॥ ९ ॥ अथमित्रशत्रूनेकेनशार्दूलविक्री
डितेनाह चंद्रेति चंद्रेज्यक्षितिजादयः अर्कादेःसुहृदः बुधादयःसमाः अन्येवैरिणोमताः मुनिभिरितिशेषः सूर्यस्यचंद्र

CC-0. In Public Domain. Digitization by eGangotri

ज्यक्षितिजाः सुहृदोमित्राणि बुधःसमः शुक्रशनीशत्रू रविबुधौचंद्रस्यमित्रे सर्वेअन्येसमाः गुर्विंदुसूर्याभौमस्यमि
त्राणि शुक्रशनीसमौ बुधःशत्रुः शुक्रसूर्यौबुधस्यमित्रे भौमगुरुशनयःसमाः चंद्रःशत्रुः रविचंद्रभौमागुरोर्मित्राणि शनिः
समः बुधशुक्रौशत्रू बुधशनीशुक्रस्यमित्रे कुजगुरूसमौ रविचंद्रौशत्रू सितज्ञौशनेर्मित्रे गुरुःसमः रवींदुभौमाःशत्रवः॥ १० ॥
अथदृष्टीःपृथ्वीवृत्तेनाह तृतीयेति तृतीयदशमादिषुचरणवृद्धितःपश्यति तत्रतृतीयदशमेचरणदृष्ट्यापश्यति नवमपंचमे

तृतीयदशमेग्रहोनवमपंचमेष्टांबुनिक्रमाच्चरणवृद्धितःस्म
रगृहंततःपश्यति ॥ कुजःसितबुधौशशीरविबुधौसित
क्ष्मासुतौगुरुर्यमशनीगुरुर्भवनपाइमेमेषतः ॥ ११ ॥

द्विचरणदृष्ट्यापश्यति अष्टांबुनिअष्टमचतुर्थेचरणत्रयदृष्ट्यापश्यति स्मरगृहंसप्तमंचतुश्चरणदृष्ट्यापूर्वंपश्यतीत्यर्थः तृ
तीयदशमेशनिः नवमपंचमेगुरुः चतुर्थाष्टमेभौमः पूर्णदृष्ट्यापश्यतीतिजातकांतरेसविशेषोज्ञेयः इमेकुजादयोमेषतःमे
षमारभ्यभवनपाराशीशाः मेषस्यकुजइत्यादि ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायंसमापयतिशालिन्या हृद्येति श्रीगणेशेनविद्वत्तायुतश्रीविशिष्टेनगणेशेनअलंकाराख्ये अलंकारनामकेमंजुलरुचिरे हृद्यैःपद्यैर्गुंफिते मनोहरैःश्लोकैरचितेस्मिन् ग्रंथे वर्यैःश्रेष्ठैः दिग्भिर्दशभिः श्लोकैः अयंआदिमःप्रथमः संज्ञाध्यायःप्रणीतउक्तः रचितइत्यर्थः ॥ १२ ॥ इतिजातकालंकारटीकायांप्रथमोऽध्यायः ॥ १ ॥ अथभावाध्यायो

हृद्यैःपद्यैर्गुंफितेसूरितोषेऽलंकाराख्येजातकेमंजुलेऽस्मिन्॥संज्ञाध्यायःश्रीगणेशेनवर्यैर्वृत्तैर्दिग्भिः संयुतोयंप्रणीतः ॥ १२ ॥ इतिजातकालंकारेप्रथमोऽध्यायः ॥ १ ॥ शुकाननसरोरुहाद्गलितमत्रभूमीतलेफलंपरमसुंदरंसकलमाकलय्याधुना ॥ ब्रवीमितनुभावतःप्रवरदैववित्तोषदंयदत्रममचापलंकिमपितत्क्षमध्वंबुधाः ॥ १ ॥

व्याख्यायते कविःस्वविनयंविशदयन्भावफलंवक्तुंपृथ्वीवृत्तेनप्रतिजानीते शुकेति शुकाननसरोरुहाद्गलितः अहंतनुभावतःतवआरभ्यतत्फलंजातकफलंअधुनाब्रवीमि हेबुधाःपंडिताः अत्रवचनेममयत्किमपिचापलंस्यात् तद्यूयंक्षमध्वमितिप्रार्थना किंकृत्वाब्रवीमि अत्रभूमितलेशुकाननसरोरुहात् शुकमुखारविंदाद्गलितंशिष्यप्रशिष्यद्वाराप्राप्तंपरमसुंदरं

CC-0. In Public Domain. Digitization by eGangotri

सकलंफलंआकलय्यविचार्य कथंभूतंफलंप्रवरैर्दैवविदांसंतोषदंउत्कृष्टज्योतिर्विदानंददं अन्यत्रोक्तमन्यतोग्राह्यमितिन्याये
नप्रथमंग्रहभावस्पष्टतातेषांबलंचज्ञातव्यम् ततोभावसामान्यफलांतरंशुभपापमित्रग्रहदृष्टियोगादिकंभावषड्वर्गाः भावेश-
स्योदयास्तादिकंज्ञातव्यं तदुक्तंपृथुयशसा योयोभावःस्वामिदृष्टोयुतोवासौम्यैर्वास्यात्तस्यतस्यास्तिवृद्धिः । पापैरेवंतस्य
भावस्यहानिर्निर्दिष्टव्याप्रश्नतोजन्मतोवा ॥ तत्रविशेषोगर्गंजातके नीचस्थोरिपुगेहस्थोग्रहोभावविनाशकृत् । उदासीनोग्र
होमध्येमित्रस्वर्क्षत्रिकोणगः ॥ स्वोच्चस्थश्चग्रहोप्येवंभाववृद्धिकरःस्मृतः ॥ व्ययाष्टषष्ठभावेषुविपरीतफलमाहउशनाचार्यः
सौम्याःपुष्टिंपापाविपर्ययसंश्रिताग्रहाःकुर्युः । मूर्त्यादिषुनिधनांत्यरिपुभावेव्युत्क्रमात्फलदाः ॥ अन्यच्च सौम्यवर्गाश्रिताभा
वाः शुभतांप्राप्नुवंतिहि । पापवर्गाधिकानेष्टास्तन्वाद्यानात्रसंशयः ॥ लग्नलग्नाधिपौस्यातांबलाधिकतरौयदि । तत्फलानां
प्रवृद्धिःस्याद्धीनोहानिकरःस्मृतः ॥ एवंभावेषुसर्वेषुभावभावेशयोर्बलात् । ततोजनुषिवक्तव्याहानिर्वृद्धिश्चकोविदैरिति
सर्वार्थचिंतामणौ लग्नादिभावाद्रिपुरंध्ररिःफेपापग्रहास्तद्भवनादिनाशः । सौम्यास्तुतेषूक्तफलप्रदाःस्युस्तन्वादिका
नांफलमेवमाहुः ॥ यद्भावनाथोरिपुरंध्ररिःफेदुःस्थानपोयद्भवनस्थितोवा । तद्भावनाशंकथयंतितज्ज्ञाःशुभेक्षितेतद्भवनस्य
सौख्यम् ॥ तत्तद्भावेत्रिकोणेवसुखमदनभेचास्पदेसौम्ययुक्तेपापानांदृष्टिहीनेभवनपसहितेपापखेटैरयुक्ते । भावानांपुष्टिमा
हुस्त्वथचशुभकरीमन्यथात्वेप्रणाशंमिश्रंमिश्रैर्गृहेंद्रैःसकलमपितथामूर्तिभावादिकानामिति ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्रिभिःश्लोकैस्तनुभावविषयमाह देहाधीशइति देहाधीशःलग्नस्वामीक्रूरयुतःपापग्रहेणयुक्तः व्ययरिपुमृतिगः द्वादशष
ष्ठाष्टमान्यतमस्थानगतश्चेत्तदाजातस्यदेहसौख्यंनस्यात् अस्ययोगस्यधनादिभावेविचार्यत्वद्योतनायप्रथमंयुक्तिरितिगम्यते
यद्भावनाथेरिपुरंध्ररिःफेतद्भावनाशंकथयंतितज्ज्ञाः ॥ इतिप्रागुल्लिखितत्वात् अन्यदाह व्ययेशोव्यये षष्ठेशःषष्ठे अष्टमाधी
शोऽष्टमेचतत्फलस्यैवकर्तादेहसौख्याभावकर्तास्यात् अयमर्थोयवनमतेनविरुद्धोयथाबृहज्जातके रिपुभवनपेरिपुस्थेनीरुग्वै

देहाधीशःसपापोव्ययरिपुमृतिगश्चेत्तदादेहसौख्यंनस्याज्जंतोर्निजर्क्षेव्यय
रिपुमृतिपस्तत्फलस्यैवकर्ता ॥ मूर्तौचेत्क्रूरखेटस्तदनुतनुपतिःस्वीयवी
र्येणहीनोनानातंकाकुलःस्याद्व्रजतिहिमनुजोव्याधिमाधिप्रकोपम् ॥ २ ॥

रीसुखीकृपणः। निधनपतौनिधनस्थेव्यवसायीव्याधिवर्जितोप्युदितः ॥ विरोधशमनायअयमर्थोबोध्यः देहाधीशेव्यय
रिपुमृतिगेसतितद्भवनपेपितत्रस्थेशुभफलंस्यादितिनवाच्यंपूर्वोक्तयोगेसतिव्ययरिपुमृतिपः स्वभवनगतश्चेत्तत्फलस्यैवकर्तेतिवा
च्यं योगानामचिंत्यफलत्वादिति अथान्ययोगमाह मूर्ताविति मूर्तौलग्ने तनुपतिः क्रूरग्रहःक्रूरखेटः लग्नेशःस्वीय
वीर्येणहीनः स्वकीयबलरहितश्चेत्तदाजातोमनुजः नानातंकाकुलः अनेकरोगाकुलः व्याधिंरोगंआधिप्रकोपंचिंताव्या

CC-0. In Public Domain. Digitization by eGangotri

 सत्वंव्रजतिप्राप्नोति बलत्वंपरपुंग्रहंनीचास्तत्वाभिर्ज्ञेयं तदुक्तंजातकामृते स्वोच्चंमूलत्रिकोणंस्वगृहमधिसुहृद्देहकंमित्रकं
स्यादौदासीनंसमर्क्षेरिपुभवनमधियोर्भंचनीचाभिधानं । पूर्वेपूर्वेबलीयःपरमपरमिदंहीनसत्वंतदस्मादित्यादिवत्पद्धतिप्रकार
मतेनउत्तमबलत्वंसमत्वंहीनबलत्वंचज्ञेयं अल्पेबलेहीनबलइतिपद्धतिवचनात् ॥ २ ॥ अथशुभयोगानाह अंगाधी
 शःलग्नेशोलग्नेचेदित्येकोयोगः बुधकविभिर्युक्तोलग्नेशः केंद्रगइतिद्वितीयः स्वीयेतुंगेस्वोच्चे अजवृषभमृगांगनाःकुलीराझ

अंगाधीशःस्वगेहेबुधगुरुकविभिःसंयुतःकेंद्रगोवास्वीयेतुंगेस्वमित्रेयदिशु
भभवनेवीक्षितःसत्वरूपः ।।स्यान्नूनंपुण्यशीलःसकलजनमतःसर्वसंपन्नि
धानंज्ञानीमंत्रीचभूपःसुरुचिरनयनोमानवोमानवानाम् ॥ ३ ॥

षवणिजौचदिवाकरादितुंगाइत्याद्युक्तेः स्वमित्रेस्वमित्रगृहेअथवाशुभभवनेशुभगृहेशुभगृहैः वीक्षितःलग्नेशइतितृतीयः एषा
मन्यतमयोगेजातोमानवः मानवानांमध्येभूपादिकःस्यात् भूपःभूपालःमंत्रीअमात्यःसर्वसंपन्निधानंसर्वसंपदामाश्रयः ज्ञा
नीभूपत्वाद्युपयुक्तज्ञानवान् सत्वरूपःसत्वगुणानुरूपः अतश्चपुण्यशीलःसुकृती सुरुचिरनयनःसुंदरनयनादिशरीरः सकल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनमतः सर्वजनमान्यः पुण्यशीलशब्देनसत्यार्जववादि एतदुक्तंजातकरहस्ये यःसात्विकस्तस्यदयास्थिरत्वंसत्यार्जवंब्राह्म णदेवभक्तिरिति ॥ ३ ॥ अथानिष्टयोगत्रयंश्लोकेनाह क्रूरेलग्नेक्रूरग्रहराशौलग्नेशःस्थितःअयंएकोयोगः पुण्यवंतौरवींदू क्रूरयोर्ग्रहयोर्मध्यस्थौक्रूरमध्यस्थौ क्रूरमध्यत्वंराश्यंशापेक्षयावाज्ञेयं संकोचेप्रमाणाभावात् अयंद्वितीयोयोगः अथदिनप निशानाथयोः सूर्याचंद्रमसोः द्यूनयायीसप्तमगःभौमःबुधः पृष्ठादुदयंअधिगतःपृष्ठोदयराशौस्थितइतितृतीयोयोगः अत्रजा

लग्नेक्रूरेथयातिखलखचरगृहंलग्ननाथेरवींदूक्रूरांतस्थानसंस्थावथदिन
पनिशानाथयोर्द्यूनयायी ॥ भूमीपुत्रस्तुपृष्ठादुदयमधिगतश्चंद्रजश्चेन्म
नस्वीस्यादंधोदुष्टकर्मापरभवनरतःपूरुषःक्षीणकायः ॥ ४ ॥

तःपुरुषः मनस्वीप्रशस्तमनाइत्यर्थः अंधःदुष्टकर्मापरभवनरतः परगृहवासरतः परस्त्रीरतोवास्यात् क्षीणकायः क्षीणश रीरश्च मनस्वित्वंकालगतचंद्रस्यबलत्वेबोध्यं एवंतनुभावस्यशुभाशुभयोगाउक्ताः ननुकचिच्छुभयोगेपिशुभफलंनोपल भ्यते तथाअशुभयोगेशुभफलमिति तत्रकोविशेषइतिचेत्सत्यं क्रूरग्रहदृष्टयुतत्वादियोगेनअयंभावः शुभयोगकारकग्रहोप रिक्रूरदृष्टौसत्यांविनिश्चयप्राप्तंफलंनोपलभ्यते अशुभयोगकर्तरिग्रहोपरिशुभदृष्ट्याऽशुभंनोपलभ्यते ताजिककारैरित्थशाल

स्यदृष्टिप्रयुतमणऊंयोगेनभजंतंकृतमुक्तं बृहज्जातककारेण नशुभाउदितायोगायथाभवंतिशुभेक्षिताइत्युक्तं इतितनुभावः ॥ ४ ॥ अथधनभावफलंश्लोकद्वयेनब्रुवन् प्रथमेनयोगचतुष्टयमाह कोशाधीशइति कोशाधीशोधनेशः गुरुयुतः केंद्रेवा चेत्तदाजातस्यसर्वसंपत्प्रदःस्यात् अथानंतरमन्ययोगउच्यतेइत्यर्थः गुरुयुतोधनाधीशःत्रिकेषुषष्ठाष्टमद्वादशेषुअन्यतमेचे ज्जातोमनुजःक्लेशभागृद्रव्यहीनश्चस्यात् सगुरुः धनाधीशः षष्ठेचेदयंयोगःशिथिलोज्ञेयः तंप्रतिचाल्पधनयोगसद्भावा

कोशाधीशःस्वराशौसुरगुरुसहितःसर्वसंपत्प्रदःस्यात्केंद्रेवाथत्रिकेचेद्भवति
हिमनुजःक्लेशभाग्द्रव्यहीनः ॥ स्वांत्याधीशौत्रिकस्थौकवितनुपयुतौस्या
त्तदानेत्रहीनश्चंद्रःपापेनयुक्तोधनभवनगतःशुक्रयुङ्नेत्रहीनः ॥ ५ ॥

त् धनाधीशस्यशुभत्वेमध्यधनयोगसद्भावात् तदुक्तंबृहज्जातके लग्नादतीववसुमांश्चछशांकात्सौम्यग्रहैरुपचयोपगतैःसमस्तैः द्वाभ्यांसमोल्पवसुमांश्चतदूनतायामन्येष्वसत्स्वपिफलेष्विदमुत्कटेन अथान्ययोगः स्वांत्याधीशौद्वितीयद्वादशाधीशौशुक्र लग्नेशयुक्तौचेत्तदाजातः नेत्रहीनः अंधःस्यात् अथान्ययोगः शुक्रपापाभ्यांयुक्तश्चंद्रोधनस्थश्चेत्तदाजातोनेत्रहीनइति॥५॥ ॥ ८ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अन्यथयोगत्रयंतत्रद्वितीययोगस्यतातादिष्वतिदेशंचाह जनुषिजन्मसमयेसेंदुःसचंद्रःशुक्रःत्रिकस्थःषष्ठाष्टमद्वादशेषुअन्यतमे चेत्तदाजातोमनुजः निशिअंधकत्वंप्राप्नुयात् निशांधःस्यात् सार्कशुक्रःसूर्यशुक्रयुतः तनुभवनपतिःलग्नेशः त्रिकस्थइत्य नुषंगः तदानींजातोमनुजः जन्मांधः जन्मनैवांधः स्यादिति तातादीनांस्थाननाथाः एवंपूर्वोक्तप्रकारेणसार्केंदुशुक्रास्त्रिक

शुक्रःसेंदुस्त्रिकस्थोजनुषिनिशिनरःप्राप्नुयादंधकत्वंजन्मांधःसार्कशुक्रस्त
नुभवनपतिःस्यात्तदानींमनुष्यः ॥ एवंतातानुजांबासुतनिजगृहिणीस्था
ननाथाःस्थिताश्चेदादेश्यंतत्रतेषांप्रवरमतियुतैरंधकत्वंतदानीम् ॥ ६ ॥

स्थाश्चेत्तदानींतेषांतातादीनांअंधकत्वंप्रवरमतियुतैरादेश्यंवक्तव्यं तत्रतातःपिता अनुजःकनिष्ठभ्राता अंबामाता निजगृ हिणीभार्या प्रवरमतिशब्देनतातादीनांजन्मन्यपिअंधयोगज्ञानत्वंसूच्यते इतिधनभावः ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

अथभ्रातृसंभवतत्सुखादियोगानाह भ्रातृस्थानेशभौमौतृतीयाधिपतिभौमौव्ययरिपुनिधनस्थानगौ १२।६।८ त्रिकस्थौय
दितदाजातःबंधुहीनः सामान्यशब्दनिर्देशेनसहोदरबंधवोविवक्षितास्तैरहितइत्यर्थः सहजभवनपेसहजाधिपेस्वक्षेत्रेस्वगृहे
सौम्यदृष्टेशुभग्रहदृष्टेसतिमानवः तद्वान्बंधुमान्स्यात् सहजाधिपेशुभग्रहयुतेकेंद्रस्थेअदभ्रंबहुबंधुसौख्यंस्यात् केंद्रस्थेसहज

भ्रातृस्थानेशभौमौव्ययरिपुनिधनस्थानगौबंधुहीनःस्वक्षेत्रेसौम्यदृष्टेसहज
भवनपेमानवःस्याच्चतद्वान् ॥ केंद्रस्थेबंधुसौख्यंशुभविहगयुतेस्याददभ्रंन
राणांपापैश्चेदन्यथैतत्तदनुनिजधियाज्ञेयमित्थंसमस्तम् ॥ ७॥

भवनपे पापग्रहैर्युतश्चेदन्यथाबंधुसौख्यंनस्यात् युतेदृष्टेइत्यनुपलक्षणं इत्थंअमुनाप्रकारेणबुद्धिमद्भिर्निजधियास्वबुद्ध्यासम
स्तंभावफलंतदनुयोगविचारानंतरंज्ञेयं अयमर्थः योगेसत्यपियोगकर्तृषुभूयसीपापदृष्टिःपापयोगोयोगकर्तॄणांनीचास्तता
योगेप्रागुक्तंलक्षणंनस्यात् इतितृतीयोभावः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथचतुर्थभावफलंवदन्योगचतुष्टयमाह पातालेशः चतुर्थेशः स्वराशौशुभखचरयुतः शुभग्रहयुक्तः सन्भाग्यपेनभाग्य स्वामिनायुक्तश्चेज्जातः सामंतःस्यात् मांडलिकःस्यात् ततोयोगानंतरंलग्नस्थः वाहनेशोगुरुणापूर्णदृष्ट्याहष्टश्चेत्तदाजातः राजपूज्यः राजकृतसन्मानभाजनंस्यात् तदनुगुरुहष्टःसुखेशःलाभगश्चेत् यदागुरुदृष्टःसुखेशः यानंपश्यन्भवति तदावाह

पातालेशःस्वराशौशुभखचरयुतोभाग्यनाथेनयुक्तःसामंतःस्याच्चतश्चेत्सुरपतिगुरुणावाहनेश स्तनुस्थः ॥ संदृष्टोराजपूज्यस्तदनुचहिबुकाधीश्वरोलाभसंस्थोयानंपश्यन्नराणांनिवहमभि मतंवाहनानांप्रदत्ते ॥ ८ ॥ स्वक्षेत्रेतुर्यनाथस्तनुपतिसहितःस्यादकस्माद्गृहाप्तिःसौहार्देवा सुहृद्भिस्तदितरगृहगश्चेद्गृहालभ्ययोगः ॥ यावंतःपापखेटाधनदशमगृहप्रांत्यपैश्चेत्त्रिकस्था युक्तास्तावत्प्रमाणाज्वलनवशगताःक्लेशदाःस्युर्ग्रहानुः ॥ ९ ॥

नानांनिवहंसमूहं नराणांअभिमतंप्रदत्ते इदंयोगद्वयंवाशब्दप्रयोजकेपिज्ञेयं अन्ययोगलाभाच्चतुर्थदृष्टिविरहात् योगप्र भावप्रसंगात् ॥ ८ ॥ अथगृहप्राप्त्यादियोगानाह लग्नेशसहितश्चतुर्थभावनाथः स्वक्षेत्रेचतुर्थभवनेचेत्तदाजातस्यअयत्न

CC-0. In Public Domain. Digitization by eGangotri

तोगृहाप्तिःगृहलाभःस्यात् तथासुहृद्भिःहितकारकैर्जनैः सौहार्दंप्रीतिःसुहृज्जनयुक्तंगृहादिस्यादित्यर्थः तनुपतियुक्तः चतुर्थ
नाथः तदितरगृहगः चतुर्थभवनादन्यभवनस्थश्चेत्तदागृहालभ्ययोगः गृहप्राप्त्यभावः यावंतःक्रूरग्रहाः द्वितीयदशमचतुर्थद्वा
दशनाथैःसहिताः त्रिकस्थाः तावंतोग्रहाः जातस्यनुः नरस्यवह्निवशगताद्दग्धाः अतएवक्लेशदाःस्युः अत्रधनेशादीनांच
॥ १० ॥ तुर्णांसमुदितानामेकयोगोनविवक्षितः त्रिकभवनेयोवाभांत्यसद्भावेसावकाशत्वात् ॥ ९ ॥ अथवाहनविरामयोगौतच्छां

यावंतोवाहनस्थाःशुभविहगदृशांगोचरानोभवेयुस्तावंतोवाविरामाःप
रमगुणवतांवाहनानांनृणांस्युः ॥ क्रूराःपश्यंतियानंव्ययनिधनगताश्चे
त्तदातद्वदेवप्राज्ञैरादेश्यमेषांखलुशुभकरणंशांतिकंवाहनानाम् ॥ १० ॥

तिकरणंचाह क्रूरइत्यनुषंगः यावंतः वाहनस्थाः चतुर्थस्थाः शुभविहगदृशांगोचरानोभवेयुः शुभग्रहदृष्टानस्युः तावंतः
परमगुणवतांप्रकृष्टगुणयुक्तानांवाहनानांविरामाः विनाशाःस्युः अथद्वादशाष्टमगताःक्रूराः यावंतइत्यनुषंगः चतुर्थंपश्यंति ॥१०॥
चेत्तदापंडितैस्तद्वदेवदृष्टक्रूरग्रहसंख्याप्रायेस्ववाहनानांविरामाःस्युरित्यर्थः तत्रवाहनानांशुभकरणंशांतिकंप्राज्ञैःआदेश्यं
विधेयमितिशेषः इतिचतुर्थभावः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपंचमभावफलं निरुपायनविद्याबुद्धियोगानाह विद्यास्थानाधिपः पंचमेशः केवलोवाबुधगुरुसहितोवा त्रिकेवर्तमानश्चे त्तदाजातोविद्याहीनः त्रिकस्थेपंचमेशेबुधगुरुयोगेविद्याद्यनुकूलोनास्तीतिवाशब्देनद्योतितं अथपंचमेशः पंचमनवमकेंद्रेषु स्थितश्चेत्तदाजातः विद्यावान् बुधगुरुयोगेविद्यावत्त्वंकिमुतवक्तव्यमितिगम्यते अथजन्मकालेप्रज्ञायोगकर्तॄणांगगनसदांग्र

विद्यास्थानाधिपोवाबुधगुरुसहितश्चेत्त्रिकेवर्तमानोविद्याहीनोनरःस्यादथनवमनिजक्षेत्रकेंद्रेषुत
द्वान् ॥ बालत्वंवृद्धतावायदिगगनसदांजन्मकालेतदास्यात्प्रज्ञामांद्यंनराणामथयदिविहगः
स्वर्गगोदोषहृत्स्यात् ॥ ११ ॥ वाक्स्थानेशोगुरुर्वाव्ययरिपुविलयस्थानगोवाग्विहीनश्चेवंपि
त्रादिकानांपतयइहयुतामूकतास्याच्चताभ्याम् ॥ वागीशात्पंचमेशस्त्रिकभवनगतःपुत्रधर्मांगना
थारंध्रेद्दव्ययांतिमस्थायदिजनुषिनृणामात्मजानामभावः ॥ १२ ॥

हाणांबालत्वंवृद्धतावायदितदाजातानांप्रज्ञामांद्यंअल्पबुद्धिःस्यात् यदिबालोवृद्धोवाग्रहःस्वक्षेत्रगतःतदादोषहृत् प्रज्ञामां द्यत्वप्रयोजकदोषंदूरीकुर्यादित्यर्थः ॥ ११ ॥ अथमूकत्वसंतानाभावयोगानाह वाक्स्थानेशोपंचमेशोगुरुर्वाव्ययरिपुविल

CC-0. In Public Domain. Digitization by eGangotri

यस्थानगस्त्रिकस्थश्चेत्तदावाग्विहीनःमूकःस्यात् अथपित्रादिमूकतायोगमाह एवंप्रकारेणपित्रादिभावानांदशमभावादि
राशीनांपतयस्ताभ्यांपंचमेशगुरुयुताः त्रिकेतिष्ठंतिचेत्तदातातादीनांमूकत्वंस्यात् आदिशब्दात्अनुजादयोज्ञेयाःअथजन्म
नि जीवात्जीवाधिष्ठितराशेःपंचमेशःत्रिकस्थः पुत्रधर्मांगनाथाःपंचमनवमलग्नेशाः जन्मलग्नात्त्रिकस्थाःयदितदापुत्राणा
मभावोवाच्यः ॥ १२ ॥ अथसंतानयोगमाह तेपुत्रधर्मांगनाथाःशुभखगसंहिताश्चेत्तदासंतानोत्पत्तौकिंचित्कालंविलंबः

किंचित्कालंविलंबःशुभखगसहितास्तेथकर्केसुतर्क्षेचंद्रेकन्याप्रजावान्प्रमि
ततनयवांश्चाथदेवेंद्रपूज्यात् ॥ क्रूरश्चेत्पंचमस्थःसुतभवनगतःस्यात्तदाप
त्यहीनश्छायापुत्रःस्वगेहाद्यदिभवतिसुतेसूनुरेकस्तदानीम् ॥ १३ ॥

स्यात् शुभग्रहदशांतर्दशाबलापेक्षयाविलंबइतिभावः अथकर्कराशौपंचमभावेचंद्रश्चेत्तदाकन्याप्रजावान् अथवाप्रमिततन
यवान्स्वल्पापत्यःस्यात् अथदेवपूज्यात्जीवात्पंचमस्थः क्रूरश्चेत्जीवोपिलग्नात्पंचमगस्तदापत्यहीनःसंतानरहितःस्यात्
यदिस्वगेहात्स्वराशितःपंचमेछायापुत्रःशनिश्चेत्तदाएकपुत्रःस्यात् अत्रसंपूर्णदृष्ट्याशुभकृतस्यशनेः स्वराशेःपुत्रभवनेदृ
ष्ट्यानेकपुत्रयोगस्तदारविभौमयोःस्वगेहात्पंचमस्थयोरेकपुत्रत्वंकिमुतवक्तव्यमितिगूढोभिप्रायः ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथअन्ययोगमाह नंदनेपंचमभावेकुंभेछायासूनुरित्यनुषंगः यदितदापंचपुत्राःस्युः मकरेआत्मजास्तिस्रः मकरस्यस्त्री राशित्वादितिभावः भौमेमकरेचेदित्यनुषंगः सुतानांत्रयंस्यात् अथरौहिणेयः बुधः पंचमेसुतादायकःकन्याप्रदः इत्थं शुक्रश्चंद्रोपिपंचमेसुतादायकः एवंकेवलेनग्रहयोगरहितेनपंचमस्थेनगुरुणापंचपुत्राःस्युः पंचमेमेषेवृषेकर्केवाकेतुराह्वोरेके

कुंभेचेत्पंचपुत्रास्तदनुचमकरेनंदनेप्यात्मजाःस्युस्तिस्रोभौमःसुतानांत्रितयम
थसुतादायकोरौहिणेयः ॥ इत्थंकाव्यःशशांकोजनुषिचगुरुणाकेवलेनैवपु
त्राःपंचस्युःकेतुराह्वोःक्रियवृषभवनेकर्कटेनोविलंबः ॥ १४ ॥

तरेइतिशेषः नोविलंबः संतानोत्पत्तौप्रतिबंधोनभवतीत्यर्थः नोविलंबइत्यनेनसूचितंमकरकुंभातिरिक्तिराशौपंचमेशनौम करमंतरेणतत्रस्थेभौमेक्रियादिराशीन्विहायपंचमेराहौवाकेतौसंततेर्विलंबएवेति ॥ १४ ॥

CC-0. In Public Domain. Digitization by eGangotri

ननुकतिवर्षाणिविलंबइत्याह पापग्रहोजीवोवाचतुर्थस्थः पंचमेषष्ठेवाचंद्रः खगुणमितसमातुल्यःत्रिंशद्वर्षमितः प्रबंधः संतते रित्यनुषंगः प्रकृष्टोबंधः शुभग्रहदृष्ट्यावियुक्ताः यावंतःपंचमस्थाः क्रूरग्रहाःस्युः बलाधीनफलाःखगाइत्युक्तप्रकारैःस्थान दिगादिबलरूपकैः किंतदितिध्येयंतावद्वर्षप्रमाणःसंततेर्निश्चयेनविलंबःस्यादित्यर्थः ॥१५॥ अथप्रतिबंधकभंजकंसंतानोपा

पापोवावासवेज्यःसुखभवनगतःपंचमेवाष्टमेवाशीतांशुःसंततेःस्यात्खगुणमितसमातुल्यएव
प्रबंधः ॥ यावंतःपापखेटास्तनयगृहगताःसौम्यदृष्ट्यावियुक्तास्तावद्वर्षप्रमाणोनियतमिहभ
वेत्संततेर्वाविलंबः ॥ १५ ॥ तत्प्राप्तिर्धर्ममूलातदनुबुधकवीशंकरस्याभिषेकाच्चंद्रश्चेत्तद्वदेव
त्रिदिवपतिगुरुर्मंत्रयंत्रौषधीनाम् ॥ सिद्ध्यामंदारसूर्यायदिशिखितमसीतत्रवंशेशपूजाकार्या
प्रायोक्तरीत्याबुधगुरुनवपाःक्षिप्रमेवात्रसिद्धिः ॥ १६ ॥

॥१२॥

यमाह तत्प्राप्तिःसंततिप्राप्तिः धर्ममूलाश्रुतिस्मृतिविधिगतोधर्मःमूलंहेतुर्यस्याःसातथा आदित्यसप्तमीव्रतशंकराराधनसंता नगोपालमंत्रजपहरिवंशश्रवणादिविहितधर्ममूलेतिभावः अत्रविशेषः तदनुतत्पश्चाद्बुधकवीविलंबप्रयोजकौचेत्शंकरस्याभि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षेकाद्युद्राध्यायोक्तमंत्रकरणकाभिषेकात्तत्प्राप्तिरित्यनुषंगः चंद्रश्चेत्पूर्ववज्ज्ञेयंगुरुश्चतथा यदामंत्रौषधीनांसिद्ध्या सिद्धिश ब्दः यंत्रादिभिःप्रत्येकंसंबध्यते यंत्रसिद्ध्याऔषध्यसिद्ध्येतिमंत्राचरणेनयंत्रग्रंथोक्तानियंत्राणिसंतानगोपालमृत्युंजया दीनि औषध्यः लक्षणाद्यास्तासांसिद्धिः विधिवदनुष्ठानसाध्यफलेत्यर्थः शनिभौमसूर्यराहूणांमध्येकस्यचित्प्रतिबंधकत्वे तत्रवंशेशपूजाकुलदेवतापूजनं आम्नायोक्तरीत्याकार्या आम्नायशब्दःवेदस्मृतिपुराणाद्युपलक्षणः तत्रापिविशेषः बुधगुरुन

षष्ठेशेपापयुक्तेतनुनिधनगतेनुःशरीरेव्रणाःस्युश्चादेश्यंतज्जनित्रीजनकसुत
वधूबंधुमित्रादिकानाम् ॥ इत्थंतत्स्थानगामीशिरसिदिनमणिश्चाननेशी
तभानुःकंठेभूसीतनूजोहृदिशशितनयोवाक्पतिर्नाभिमूले ॥ १७ ॥

वमस्थानपाःप्रतिबंधकाश्चेद्रुमानुष्ठानात्शीघ्रमेवसिद्धिःस्यादिति इतिपंचमभावः ॥ १६ ॥ अथरिपुभावफलंवक्तुकामस्ता वद्व्रणरोगानाह पापग्रहयुतेषष्ठेशेलग्नाष्टमगतेसति नुःमनुजस्यशरीरेव्रणाःस्युरित्यादेश्यंवक्तव्यं अंगविशेषव्रणानाह त त्स्थानगामीतनुनिधनगतः षष्ठेशोदिनमणिःसूर्यश्चेत् शिरसिव्रणः चंद्रश्चेन्मुखे भौमश्चेत्कंठे बुधश्चेद्धृदये वाक्पतिश्चेन्नाभि

CC-0. In Public Domain. Digitization by eGangotri

मूलेव्रणाःस्युः ॥१७॥ शुक्रश्चेन्नेत्रमूलेपृष्ठेच शनिश्चेत्पदेचरणे राहुःकेतुर्वाअधरेव्रणाःस्युरित्यग्रिमश्लोकेनान्वयः अथनेत्र
व्याधियोगः तदनुभौमबुधराशिस्थोलग्नेशः भौमबुधदृष्टःकतिचित्स्थानगोपिवायत्रकुत्रवास्यात्तदानींजातः नेत्ररोगीस्यात्
प्रवरमतियुतैर्होरिकैरेवंज्ञेयम् ॥१८॥ अथान्ययोगः षष्ठभावाधिपेलग्नस्थेजातः शत्रुहंतास्यात् धनस्थेषष्ठेशेपुत्रात्तार्थःपुत्रेणा

नेत्रपृष्ठेचशुक्रोऽदिनकरतनयःस्यात्पदेचाधरेचेत्केतुर्वासैंहिकेयस्तदनुतनुपतिर्भौमवित्क्षेत्रसंस्थः ॥
आभ्यामालोकितःसन्भवतिहिकतिचित्स्थानगोवातदानींनेत्ररोगीनरःस्यात्प्रवरमतियुतैर्होरिकै
र्ज्ञेयमेवम् ॥ १८ ॥ षष्ठेशेलग्नयातेभवतिहिमनुजोवैरिहंताधनस्थेपुत्रात्तार्थोतिदुष्टःसहजभवनगेग्रा
मदुःखाकरःस्यात् ॥ नाभिस्थानेचरोगीतनुनिधनपतीशत्रुभावस्थितौनानेत्रवामेतरेस्यादसुर
कुलगुरुःसूर्यजस्त्वंघ्रिरोगी ॥ १९ ॥

त्तोगृहीतःअर्थोधनंयस्यसपुत्रहृतधनइत्यर्थः अतिदुष्टश्चस्यात् सहजभवनगेग्रामस्यदुःखकरः नाभौरोगीचस्यात् लग्नाष्टमप
तीषष्ठस्थौनापुरुषोनेत्ररोगीस्यात् अग्रेवामेतरशब्दोपादानात् अत्रवामइतिगम्यते शुक्रःषष्ठेष्टमेइतरेदक्षिणनेत्रेरोगी शनिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठेचरणरोगीस्यात् ॥१९॥ अथान्ययोगः राहुकेतूशत्रुभावेचेद्दंतेदंतच्छदे ओष्ठेवारोगीस्यात् भौमबुधराशिस्थितोलग्नेशः स्वेनस्वशत्रुणापूर्णदृष्टः यत्रकुत्रापिस्यात्तदाआसनार्द्धेगुदसमीपेवारोगीस्यात् यदितौभूमिसूर्यपुत्रौरिपुगृहगौषष्ठभावसंस्थौ चेत्तदातद्भवः नुःपुरुषस्यगदोरोमःस्यात् ॥२०॥ तथाप्रालेयांशौचंद्रेखलखगसहितेपापग्रहयुक्तेशत्रुभावस्थेसतिरोगवान्स्या

दंतेदंतच्छदेवाकुमुदपतिरिपुःसंस्थितःषष्ठभावेकेतुर्वालग्ननाथःकुजबुधभवनेसंस्थितःक्वापिदृष्टः ॥ स्वेनप्रत्यर्थिनावाभवतिजनुषिचेदासनार्द्धेसरोगस्तौभूमीसूर्यपुत्रौयदिरिपुगृहगौतद्भवःस्याद्गदोनुः ॥ २० ॥ प्रालेयांशौरिपुस्थेखलखगसहितेमानवोरोगवान्स्यात्क्रूरैर्निष्पीडितश्चेत्तनुसदनगतःशीतरश्मिस्तदानीम् ॥ क्रूरेकेंद्रालयस्थेयदिशुभविहगैर्नेक्षितेरोगवान्स्यात्तस्मिन्काव्यालयस्थेकुजगुरुकविभिर्नेक्षितेतद्वदेव ॥ २१ ॥

त् क्रूरैर्निष्पीडितेशनिप्रभृतिभिःक्रूरग्रहैः योगेनदृष्ट्यावापीडितेतनुसद्नगतेलग्नगेतस्मिन्शीतकरेचंद्रेतदानूरोगीस्यात् शुभग्रहदृष्टिरहितःकेंद्रगःक्रूरश्चेद्रोगवान्स्यात् तस्मिन्क्रूरेशुक्रराशिसंस्थेकुजशुक्रगुरुभिर्नदृष्टेतद्वदेवरोगवानेवस्यात् अत्रपद्य

पिविशेषोनोक्तस्तथापियोगकर्तृगृहस्वामिकफव।तपित्तादिकोपजन्योविशेषरोगोज्ञेयः ॥२१॥ षष्ठेशेपुंराशिलग्नेस्वोच्चेवापा पग्रहैर्दृष्टेसतिनराणांजातानांअंगेशरीरेअरिजनवशतः शत्रुजनकारितःगूढरूपः प्रच्छन्नःगदोरोगःस्यात् अत्रग्रहतुंगराशीनांप्रायःस्त्रीराशित्वात्पुंलग्नेवाशब्दप्रयोगेभिन्नएवयोगोज्ञायते षष्ठेशोराहुयुक्तः यद्वासूर्ययुक्तः द्वादशेवास्थितः तदाजातः

पुंलग्नेस्वीयतुंगेरिपुभवनततौवीक्षितेसन्नभोगैरंगेनूनंनराणामरिजनवशतःस्याद्गदोगूढरूपः ॥
रिःफस्थानेस्थितेचेदरिसदनपतौसिंहिकापुत्रयुक्तेकिंवासप्ताश्वयुक्तेपरगृहवसतिर्नीचवृत्तिर्नरः
स्यात् ॥ २२ ॥ यावंतोवाविहंगामदनसदनगाश्चेन्निजाधीशदृष्टास्तावंतोनुर्विवाहास्त्वथसुम
तिमताज्ञेयमित्थंकुटुंबे ॥ कार्योहोरागमज्ञैरधिकबलवतांखेचराणांहियोगादादेश्यंतत्रवीर्यं
विविधुकुभुवामंगदिक्शैलसंख्यम् ॥ २३ ॥

नरःपरगृहवासीनीचवृत्तिश्चस्यात् ॥२२॥ अथसप्तमभावफलंनिरूपयिष्यन् विवाहयोगमाह यावंतोग्रहाः सप्तमस्थाः सप्तमेशेनदृष्टास्तावंतोविवाहाः नुःपुरुषस्यज्ञेयाः सुमतिमताजन्मलग्नाभिज्ञेनदैवज्ञेन एवमुक्तप्रकारेणकुटुंबेजनकभ्रात्रादौज्ञेयं

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

होरागमज्ञैर्जातकशास्त्रविद्भिरधिकबलवतांग्रहाणामेवयोगाद्विचारःकार्यः तत्राधिकबलंरविविधुकुभुवांरविसूर्यचंद्रभौमा नांअंगदिक्शैलसंख्यमादेश्यंसूर्यस्यषड्रूपाणिचंद्रस्यदशरूपाणिभौमस्यसप्तरूपाणि अन्येषांषड्रूपाण्येव अंगरूपाधि कोबलीतिपद्धतिवचनात् ॥ २३॥ गृहिणीकारकाः सप्तमभावेशुभग्रहाः शुक्रेंदुजीवशशिजैः सकलैस्त्रिभिर्वाद्वाभ्यांकलत्रभ

केंद्रस्थावात्रिकोणेयदिखलुगृहिणीकारकाख्यानभोगाःकामार्थेशौनिजर्क्षेपरि
णयनविधिःस्यात्तदानींनुरेकः ॥ जायाधीशःकुटुंबाधिपतिरपियुतश्चेत्त्रिकेगर्हि
ताख्यैर्यावद्भिःशुक्रयुक्तोनियतमिहभवेत्तावतीनांविरामः ॥ २४ ॥

वनेचतथैकैकेन एषांगृहेपिचगणेपिविलोकितेवासंतिस्त्रियोमदनभावपतिस्वभावाइतिकल्याणवर्मवचनात् एतेकेंद्रस्थावा त्रिकोणेस्युः तथासप्तमद्वितीयपतीस्वभवनेस्यातां तदाजातस्यनुःपुरुषस्यपरिणयनविधिः विवाहएकःस्यात् सप्तमभावाधी शः द्वितीयाधिपोवाशुक्रयुक्तोयावद्भिःक्रूरग्रहैर्दृष्टोरहितः त्रिकेस्यात् तावतीनांस्त्रीणांविरामोनाशःस्यात् ॥ २४ ॥

CC-0. In Public Domain. Digitization by eGangotri

अथगर्भभावयोगानाह सप्तसप्तौसूर्येलग्नस्थेशनौसप्तमस्थेएकोयोगः अथसूर्यशनीसप्तमेगुरुदृष्टिरहितश्चंद्रोदशमइतिद्वितीयो
योगः अत्रनारीनोप्रसूते द्वेष्येशः शत्रुभवनस्वामी तथामित्रमंदौरविशनोचद्विषिषष्ठेबुधेनदृष्टः सितकिरणश्चंद्रोस्तेसप्तमे
अयंतृतीयोयोगः अत्रनारीनोप्रसूते कुजशनीषष्ठेचतुर्थेयदितदाजातस्यनारीगर्भिणीनस्यादितिचतुर्थोयोगः इतिसप्तमभा

लग्नस्थेसप्तसप्तौदिनमणितनयेकामगेचार्कमंदौद्यूनेचंद्रेनभस्थेनचयदिगुरुणालोकितेनोप्रसू
ते।।द्वेष्येशोमित्रमंदौद्विषिसितकिरणोऽस्तेबुधेनेक्षितोनोसूतेद्वेष्येजलर्क्षेयदिकुजरविजौगर्भि
णीस्यान्ननारी ॥ २५ ॥ रंध्रस्थानस्थितावास्थिरभवनगताःशुक्रवागीशसौम्याःकृच्छ्राणां
कर्मणांनाभवतिहिनियतंकारकस्तब्धभावः।। बाल्येदुःखीनरःस्यान्निधनगृहपतौलाभयाते
सुखीस्यात्पश्चात्पापेल्पमायुःशुभखगसहितेदीर्घमायुर्नराणाम् ॥ २६ ॥

वः॥२५॥अथाष्टमभावः कष्टकर्मकरादियोगमाह शुक्रगुरुबुधाः अष्टमस्थाः स्थिरराशिगतावा तदाजातःनापुरुषःनियतं
नियमेनकष्टकर्मणांकर्तास्यात् स्तब्धभावः कठिनचित्तश्चस्यात् अष्टमभावेशेलाभगेबाल्येबाल्यावस्थायांदुःखीपश्चात्सुखी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यात् लाभगेष्टमेशेपापेअल्पायुःस्यात् तस्मिन्नेवशुभग्रहयुक्तेजातानांदीर्घमायुःस्यात् ॥२६॥ आयुर्गृहेशः अष्टमपतिः क्रूरग्रहयुक्तःषष्ठद्वादशगतः तदाऽल्पमायुःकुर्यात् अष्टमपतिः लग्नेशयुक्तः अरिप्रांत्यसंस्थइत्यनुषंगः तदास्वल्पमायुःप्रदत्ते अष्टमेशः तदनुरविभुवोवातत्राष्टमेतद्वत्चिरायुःप्रदत्ते लयेशोअष्टमेशः कोशस्थानस्थितः द्वितीयेस्थितश्चेत्तदातस्करोवैरियुक्त

कुर्यादायुर्गृहेशःखलखगयुगरिप्रांत्यसंस्थोल्पमायुश्चेद्लग्नाधीशयुक्तोनिधनभवनपःस्वल्पमायुः प्रदत्ते ।। रंध्रस्थोवाचिरायुस्तदनुरविभुवस्तत्रतद्वल्लयेशोक्लेशस्थानस्थितश्चेज्जनुषिहिमनुजोवैरियुक्तस्करःस्यात् ॥ २७॥ आयुर्देहाधिनाथौनिधनरिपुगतौहीनवीर्यौप्रसूतौसंग्रामेकीर्तिशेषंव्रजतिबलयुतौतौतदातज्जयाप्तिम् ॥ शुक्रेणांदोलिकायास्तनुपविधियुतोवाहनस्थाननाथोमूर्तौदंतावलेंद्रैरथगुरुसहितःस्याज्जयोगंधवाहैः ॥ २८ ॥

श्चस्यात् ॥२७॥ प्रसूतौजन्मसमयेआयुर्देहाधिनाथौअष्टमलग्नपतीहीनवीर्यौअष्टमषष्ठगतौतदासंग्रामेकीर्तिशेषंप्राप्नोति संग्रामाभिमुखोयुद्धंविहायपंचत्वंप्राप्नोतीत्यर्थः तावेवायुर्देहाधिनाथौसबलौचेद्विजयीभवति चतुर्थेशःशुक्रेणयुतश्चेत् आंदो

CC-0. In Public Domain. Digitization by eGangotri

लिकायाः शिबिकायाःजयः शिषिकारूढोजयतीत्यर्थः चतुर्थेशःलग्नेशेनचंद्रेणचयुतः मूर्तौलग्नेस्थितश्चेत्तदादंतावलेंद्रैःमहा
गजैःजयःस्यात् अथचतुर्थेशोगुरुयुतः लग्नेचेत्तदावाजिवाहैः वाजिगजैः गजेंद्रैश्चसहजयःस्यात् इत्यष्टमभावः ॥ २८ ॥
अथनवमभावः शुभयोगमाह नवमभावेशोगुरुदृष्टः लग्नस्थश्चेत्तत्रजातोराजवंद्योराजमान्यःस्यात् भाग्येशोनवमाधिपोल

भाग्येशोमूर्तिवर्तीसुरपतिगुरुणालोकितोभूपवंद्योलग्नस्थोवाहनेशोनवमप
तिरुभौपश्यतश्चेत्स्वगेहम् ॥ सर्वासामास्पदंस्यान्मनुजइहतथासंपदांवाहनें
दोरंध्रस्थानस्थितश्चेद्व्रजतिहिमनुजोभाग्यराहित्यमेवम् ॥ २९ ॥

ग्नस्थः चतुर्थनवमपतीस्वभवनंचतुर्थपतिःचतुर्थंनवमपतिर्नवमंपूर्णदृष्ट्यापश्यतश्चेत्तदासर्वासांधनधान्यसुवर्णादिसंपदांआ
स्पदंआश्रयोमनुजःस्यात् वाहनेशः अष्टमस्थस्तदामनुजः भाग्यराहित्यंव्रजति होराविद्भिरेवंप्रकारेणभाग्यराहित्येनुः
हीनानांशुभलक्षणवयोबलादिरहितानांप्राप्तिस्तदनुचपलतास्थिरताचज्ञेयेत्यग्रिमेणसंबंधः ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथनवमेशेलाभगेराजमान्योदीर्घायुर्धर्मशीलश्चस्यात् तदनुजनुषिधनवपुर्वाहनेशोद्वितीयलग्नचतुर्थपतयः स्वगेहेलग्नेशोलि ग्नेधनेशोधनेवाहनेशोवाहनभवनेइत्यर्थः धर्मेशोलग्नगतोयदितदागजस्वामिसिंहासनानांप्राप्तिरित्यनुषंगः तत्रगजाह स्तिनः स्वामिसिंहासनंराजाधिष्ठेयसिंहासनंराज्यकार्येषुभद्रासनंतेषांप्राप्तिःस्यात् ॥ ३० ॥ अमीषामुक्तवक्ष्यमाणानां

हीनानांवाहनानांतदनुचपलताप्राप्तिरेवंनराणांज्ञेयाहोरागमज्ञैरथनवमपतौलाभगेराजवंद्यः ॥
दीर्घायुर्धर्मशीलस्तदनुधनवपुर्वाहनेशःस्वगेहेधर्मेशोलग्नवर्तीजनुषियदिगजस्वामिसिंहासनाना
म् ॥ ३० ॥ योगानांस्यादमीषांप्रचुरबलयुतोयोधिपस्तद्दशायांलब्धिश्चांतर्दशायामथगुरुभृगु
जौवाहनाधीशयुक्तौ ॥ केंद्रेयानेत्रिकोणेत्वथगुरुकवियुग्वाहनस्थानगोवाभाग्याधीशःस्वरा
शौभवतिनरपतिर्वाहनव्यूहनाथः ॥ ३१ ॥

योगानांयोधिपः योगकर्तायोग्रहअधिकबलयुतस्तस्यदशायां अंतर्दशायांलब्धिः योगफललाभःस्यात् अथगुरुशुक्रौवाहने शयुतौसंतौकेंद्रेअथानेआगमेएकादशेइत्यर्थः त्रिकोणेस्यातामित्येकोयोगः अथगुरुशुक्रयुतोभाग्याधीशः भाग्येचतुर्थेवा

CC-0. In Public Domain. Digitization by eGangotri

स्यात्तदाद्वितीयोयोगः अत्रयोगद्वयेजातः वाहनव्यूहानांसमुदायानांनाथईशोनरपतिःस्यात् ॥३१॥ अथचिंतायोगः भौमेकर्मस्थेक्षेत्रचिंता कर्षणवीजवापक्षेत्रसंस्कारादिप्रकारकक्षेत्रचिंताइत्यर्थः त्रिकभवनगतेषष्ठाष्टमद्वादशेमहीजेसौख्यचिंतासकलविषयप्रयुक्तसौख्यचिंतास्यादित्यर्थः वागीशेत्रिकस्थेवाहनभूषणवस्त्राश्वभवाचिंतास्यात् चंद्रेसितेवात्रिकस्थेचा

कर्मस्थेक्षेत्रचिंतात्रिकभवनगतेसौख्यचिंतामहीजेवागीशेयानभूषावसनह
यभवाचामरच्छत्रचिंता ॥ प्रालेयांशौसितेस्यादथमदनगतेवाक्पतौपुत्र
चिंतासंस्थानस्थानयातेहिमकरतनयेबुद्धिजायत्रिकोणे ॥ ३२ ॥

मरच्छत्रचिंतातत्प्राप्तौरक्षणेचचिंतास्यात् अथवाक्पतौगुरौसप्तमस्थेपुत्रचिंतापुत्रविषयकगोरक्षणादिचिंतेत्यर्थः बुधेपंचमेबुद्धिजाचिंतासूर्येत्रिकोणस्थेपितुर्बांधवस्यचाचिंता शुक्रेसुतनवमसप्तमगेयात्राचिंता अथगुरौनवमपंचमेपुत्रजापुत्रभवाचिंतास्यात् चिंतानामयेषांजनानांक्षेत्राधिसंभवस्तेषांवद्विषयलाभाशुभानुकूल्यप्रातिकूल्यादिसंस्मृतिः इतिनवमभावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथदशमभावफलमर्धेनाह जनुषिकर्मभावेशोविवीर्योनिर्बलश्चेत्तदाजातः सर्वकर्मास्पदंसर्वकर्मणामास्पदंस्थानंनो सर्वकर्मसाधकोनस्यात् अर्थात्तुजनुषिकर्माधीशोबलीचेत्सर्वाणिकर्माणिसाधयेज्जातइत्यर्थः यदाशुभग्रहयुतोदशमाधीशः स्वीयगेहेदशमेचेत्तदाजातोमानवोमानशीलोमानीभवेत् ॥ ३३॥ अथदीर्घमध्यमायुर्योगानाह यदानृणांजन्मसमयेलग्नाष्टमदशमे

मार्तंडेतातबंधोरथसुतनवमद्यूनगेदानवेज्ये यात्राचिंतानराणामथनवमसुतेपुत्रजावासवेज्ये ॥
कर्माधीशोविवीर्योयदिजनुषितदासर्वकर्मास्पदंनो गेहेस्वीयेयदासौ शुभविहगयुतोमानवोमा
नशीलः ॥ ३३ ॥ लाभेकेंद्रेत्रिकोणेतनुनिधनभवस्थानगाःसंस्थिताश्चेद्दीर्घायुःपापखेटाः
पणफरहिबुकत्रिस्थितामध्यमायुः ॥ हीनायुःप्रोक्तमंतेयदिजनुषिनृणांस्युस्तदापोक्लिमस्था
रंध्रस्थानस्थितानांतनुपतिगगनस्वामिसूर्यात्मजानाम् ॥ ३४ ॥

शाःलाभेकेंद्रेत्रिकोणेचस्थिताश्चेद्दीर्घमायुःस्यात् पापग्रहाः पणफरचतुर्थतृतीयस्थिताः मध्यमायुःस्यात् एतेपूर्वोक्ताआपोक्लिमस्थाश्चेदल्पायुःस्यात् द्वात्रिंशद्वर्षादर्वाग्हीनायुःचतुःषष्ट्यनंतरंदीर्घायुर्ज्ञेयं लग्नेशदशमेशशनीनांअष्टमस्थानस्थितानां

CC-0. In Public Domain. Digitization by eGangotri

मध्येयोहीनः हीनबलस्तस्यदशापर्यंतमायुःस्यादित्युत्तरेणसंबंधः ॥३४॥ अथधर्मकर्मात्मजेशाः नवमदशमपंचमेशाः स्वभवने नवमादिकेस्युस्तदातेषांयोधिकबलस्तस्यदशायांजातस्यधर्मबुद्धिःस्यात् अन्यथापरभवनेयदातेषांयोधिकबलस्तद्दशायांधर्म हानिःस्यादित्यर्थः लग्नाष्टमपतीयदिशनिराहुकेतूनामन्यतमेनयुतौषष्ठस्थौतद्दशायांतनुनिधनपत्योरधिकबलस्यदशायांव्र

योहीनस्तद्दशायुस्त्वथनिजभवनेधर्मकर्मात्मजेशाश्चेत्स्युस्तेषांदशायांबहुलबलवशाद्धर्मबुद्धिर्नराणाम् ॥ हानिःस्यादन्यथारौतनुनिधनपतीभानुपुत्रेणयुक्तौस्यातांस्वर्भानुनाचेत्तदनुचशिखिनातद्दशायांव्रणाःस्युः ॥ ३५ ॥ यानेशस्तत्रसंस्थोयदिभवतितदायानहेतुर्मृतिःस्याच्चौराच्छस्त्रेणचिंतानवमभवनतोभाग्यजाताविधेया ॥ व्योम्नोभूपालभूषावसनहयमहत्कर्मणांप्राप्तिचिंतालाभस्थानेखिलानांव्ययनिधनगृहात्कल्मषाणांविधेया ॥ ३६ ॥

णाःस्युः ॥ ३५ ॥ चतुर्थेशस्तत्रषष्ठभावेचेत्तदायानहेतुर्मृतिःस्यात् चौराच्छस्त्रेणचमृतिः तत्रेतिअरिभावपरामर्शेनयानेशस्यशन्यादियोगेवक्ष्यते अयमर्थः शनियोगेयानहेतोर्मृतिः राहुयोगेचोरान्मृतिः केतुयोगेशस्त्रेणमृतिः अथसंक्षेपादुक्तानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवमादिभावानांसामान्यचिंतालंबनंउच्यते नवमभावतोभाग्यजाताचिंताविधेया अयंभावः भाग्येयोग्रहः भाग्येशोयोग्रहः भाग्यभवनस्थोयोराशिः तद्द्रव्यारोकेंद्रग्रहाभाग्यभवनेशुभाशुभवर्गविवेकः भाग्यभाग्येशबलाबलत्वमित्यादिविचार्यं जातकशास्त्रविचारंपरिभूयबुद्ध्याफलंवक्तव्यं तथाभिहितंकल्याणवर्मणा भाग्यर्क्षपतिःकस्मिन्कोवाभाग्यर्क्षमाश्रितोविहगः॥ बलवान्मध्येबलोवाइत्यादितत्रान्यत्र भाग्येबलिष्ठेयदिमेषराशौचतुःपदोत्थंप्रकरोतिधर्मं ॥ वृषेबलिष्ठेबहुधेनुदायीयुग्मे

लग्नस्थेरिःफनाथेभवतिसुवचनोमानवेरूपवान्वास्ववर्गेकार्पण्यबुद्धिर्बहुतर
पशुमान्ग्रामयुक्तःसदास्यात् ॥ धर्मेतीर्थावलोकीबहुलवृषमतिःक्रूरयुक्ते
चपापीमिथ्याकोशांतकृत्स्यान्नियतमिदमितिज्ञेयमेवंसुधीभिः ॥ ३७॥

तथाब्राह्मणभोज्यदाता ॥ स्यात्कर्कटेतीर्थपरश्चसिंहेजातोमनुष्यःपरधर्मनिष्ठः ॥ यद्दृष्टिधर्मांमनुजोयुवत्यांप्रसिद्धधर्मातुलजोमनुष्यः ॥३६॥ द्वादशभावाधिपेलग्नस्थेसतिमानवः सुवचनः सुवाङ्माधुर्योरूपवान्वाभवति तथास्वर्क्षेस्वगृहेसतिकृपणबुद्धिः अनेकपशुयुक्तोग्रामयुक्तश्चग्रामाधिकारयुक्तश्चस्यात् तथाधर्मेनवमेसतितीर्थावलोकीतीर्थयात्रावान् बहुलवृषमतिः अत्यंतधर्मबुद्धिश्चस्यात् तथापापग्रहयुक्तेसतिपापी मिथ्याकोशांतकृत् वृथासंचितद्रव्यनाशश्चस्यात् अस्माद्योगान्नियतंफलंज्ञे

CC-0. In Public Domain. Digitization by eGangotri

यम् ॥३७॥प्रसिद्धधर्मेनिरतोष्टमेभवश्चापेतुशास्त्रेविहगःस्वधर्मा । मृगेविरज्येतसुधर्मतोनाकुंभेतुपापादिभवोहिधर्मः १ मीने
बलिष्ठेशुभभावजातोतडागवापीभवधर्मनिष्ठः । भाग्येशेलग्नगेभूपकर्मकारीधनेधनं । बंधुप्रियोभ्रातृभावेचतुर्थेपितृभक्तिमान् २
कृतीतुपंचमेषष्ठेजातोविकलकारकः । सप्तमेसुभगस्त्रीमान्खंडःपापाष्टमेस्थिते । स्वभेदातादेवभक्तोदशमेनृपकार्यकृत् । लाभेदी
र्घायुरखिलोऽव्ययेदेशांतरस्थितिः। स्वस्वामिदृष्टयुक्तंचेत्स्वदेशफलदायकः। मुनिभिरुक्तं होरागमश्चबलवान्येषांतेश्रेष्ठमानवाः।
होरासारे भाग्येशखलाःस्वगृहगाःशुभदृष्टियुतायदि सौभाग्यसौख्ययुक्तस्यजन्मविद्याच्चभूपतेः ३ क्रूरानीचारिभांशस्थाभा
ग्येशेनचवीक्षिताः । सर्वदाभाग्यहीनस्यजन्मविद्यान्नसंशयः ४ लग्नगेभांतरेराशौमहाभाग्योहिभाग्यतः । एकेनमध्यभाग्यः
स्याद्भावेहीनभाग्यवान् ५ गर्गजातके हंतिपुण्यंचभाग्यंचकर्मपुण्यगतोनृणां । तुंगेस्वर्क्षेसहस्रांशुःपुष्कलंधर्ममादिशेत् ६
भाग्यभाग्यंभवेद्धन्यःपितृपक्षपरायणः धर्मेपूर्णोनिशानाथःक्षीणःसर्वविनाशकृत् ७ कुजेरक्तपदानंदीभवेत्पशुपतिव्रती । भा
ग्यहीनश्चसततंनरःपुण्यगृहंगते ८ मंदभाग्योबुधेपापेशुभेसाम्येतुधार्मिकः । महाभाग्यंशुभेजीवेतथाशुक्रेबलीयसि ९ दंडप्र
दोवक्रगतेनवमस्थेशनैश्चरे । स्वर्क्षोच्चगेशनौभाग्येराजाभवतिधार्मिकः १० राहौधर्मगतेजातःसत्यशौचविवर्जितः । अन्यत्र
भाग्याधिपश्चेद्यदिकेंद्रवर्तीआदौवयस्येवसुखीमनुष्यः त्रिकोणगःस्वोच्चगतोथवास्यान्मध्येवयस्यल्पफलप्रदःस्यात् १ भा
ग्यस्यनाथेस्वगृहेथमित्रगृहेथवास्यात्स्वनवत्रिभागे । भाग्योदयंतस्यवदंतितज्ज्ञाःशुभग्रहेंद्रैश्चयुतेक्षितेच २ नीचस्थोवाशत्रुगे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हस्थितोवाभाग्यस्वामीरिःफरंध्रारिगोवा । पापैःखेटैःसंयुतोवाथदृष्टोभाग्यैर्हीनःस्याद्दरिद्रीसदैव ३ नवमभावपतीरिपुरंध्र
गोनवमभंरिपुदृष्टयुतंतथा । यदितदानचधर्मरतोनरःशुभखगैरथधर्मरतोनरः ४ अबलेपिशुभेखेटेभाग्यस्थोधार्मिकोनरः। शु
भवर्गयुतेभाग्येशुभकर्मयथान्यथा ५ इत्यादिचिंताविधेया तत्राहजातकसारावलीकारः होरेंद्वोर्बलयोगाद्योदशमस्तत्स्व
भावजंकर्म ।तस्याधिपतेश्चतथावृद्धिर्ज्ञेयातथाहानिः॥दशमेनक्षत्रपतिर्लग्नात्पुरुषस्ययस्यसंभवति ।सर्वारंभोभवतिहिविनिर्दिशे
त्तस्यजातस्य ॥ जातकसारे खस्थेखपेखलयुतेखलजेनवांशेस्वोच्चर्क्षगेस्वभवनेसुखवृत्तयःस्युः नीचारिभावगृहगेल्पसुखाल्पपु
ण्योदासोपचारभृतकानुचराश्चदासीः॥ धर्मभावेशुभक्षेत्रेशुभदृष्टेसुकर्मकृत् । पापेक्षितेपापकर्मास्वामिदृष्टेतुमध्यमः॥वैद्याःपु
रोहिताःशास्त्रस्मृतिज्ञावंचकानराः ।जायंतेकर्मगैःपापैःसौम्यग्रहनिरीक्षितैः॥ वराहे अर्थाप्राप्तिः पितृपत्नीशत्रुमित्रभ्रातृस्त्री
भृतकजनाद्दिवाकराद्यैः । होरेंद्वोर्दशमपतेर्विकल्पनीयाभेंद्वर्कास्पदगतिगोत्रनाशभृत्यां १ अर्कांशेतृणकणकर्णभेषजाद्यै
श्चंद्रांशेकृषिजलजांगनाश्रयैश्च । धात्वग्निप्रहरणसाहसैःकुजांशेसौम्यांशेलिपिगणिकादिकाव्यशीलैः॥जीवांशेद्विजविबुधदि
वाकरादिधर्मैःकाव्यांशेमणिरजतादिगोमहिष्यैः । सौरांशेश्रववधभारनीचशिल्पैःकर्मेशाध्युषितनवांशकर्मसिद्धिः॥ मित्रा
रिस्वगृहगतैस्ततस्ततोर्थात्तुंगस्थेबलिनिचभास्करेस्ववीर्यात् । राज्याधीशेकेंद्रगेसौम्यदृष्टेपापेकेंद्रस्थात्सुप्रतापाभिधानः॥जा
तोनित्यंभूमिपैःसेवनीयोभाग्यैर्युक्तःसुप्रतापप्रसिद्धइति ।अथलाभस्थानेअखिलानांवस्तूनांप्राप्तिचिंताविधेया तत्रहोराप्रदीपे।

स्वस्वामिग्रहयुतेक्षितआयुवर्गेसद्धर्मकेभवतिवस्तुविशेषलाभः । क्रूरेचदृष्टिसहितेनचतत्रलाभस्तद्वर्गकेव्यथचमिश्रफलंविध
त्ते । लाभेरवीक्षितयुतेरविवर्गयुक्तेचोराच्चतुष्पदयुताच्चभवेत्प्रतापः । तद्वद्विधौयुवतितोयजनादिजातोवित्तंसुवर्णमणियावक
शास्त्रजातः । ज्ञावेक्षितेज्ञागणआयेग्रहंधनंस्यात् शिल्पादिकालेखनैस्तुंगैःसकांस्यैर्जीवेक्षितायेगुरुवर्गयुतायेगेहेयज्ञादिहेम
हयनागरथादिमुख्यैःशुक्रेक्षितायशनिशनिवर्गयुतेमहिष्यलोहादिकृष्यवनकार्यभावाविवृद्धिः नीचारिभार्कगखगोक्तफलं

हृद्यैःपद्यैर्गुंफितेसूरितोषेऽलंकाराख्येजातकेमंजुलेऽस्मिन् ॥ भावाध्या
यःश्रीगणेशेनवर्यैर्वृत्तैर्युक्तःशैलरामैःप्रणीतः ॥ ३८ ॥ इतिश्रीजात
कालंकारेभावफलाध्यायोद्वितीयःसमाप्तः ॥ २ ॥

नद्याक्षीतिंग्रहोद्भवबलेबलिनास्तुवाच्यामिति व्ययग्रहान्निधनग्रहाच्चमलिनकर्मणांचिंताविधेया गर्गजातके क्षीणेन्दौ
वारवैरिःफेधनंपुंसामथोहरेत् । बहुधार्थक्षयोभौमेज्ञदृष्टेन्येषुसिद्धयः । नृपीडानचसंतप्तंपरिवादेनपीडितः । नृशंसंपुरुषंचांद्रिः ॥२०॥
कुरुतेव्ययराशिगः। उच्छ्रितव्ययकारीचव्ययगेदेवतागुरौ । श्रद्धाहीनोघृणाहीनोव्ययगेभार्गवेनरः। व्ययस्थानगतेमंदेक्रूरेषु
कुरुतेरुचिं व्ययेराहौनीचकर्मांकपटीकुलदूषकः । व्ययेभावेस्वामियुक्तेशुभदृष्टेचसत्यपि । कीर्तिमान्जायतेमर्त्योविपरीतेविप

CC-0. In Public Domain. Digitization by eGangotri

र्यंपः ॥३७॥ सुधीभिरिदंनियतंनियमेनज्ञेयम् अध्यायंसमापयतिशालिनीवृत्तेन श्रीगणेशेनभावाध्यायः शैलरामैर्वृत्तैः स प्तत्रिंशद्भिः श्लोकैरुक्तः ॥३८॥ इतिश्रीजातकालंकारटीकायांभावफलाध्यायोद्वितीयः ॥२॥ अथयोगाध्यायः तत्रता वत्शुभाशुभयोगान्व्यवस्ययोगांतरंवक्तुंप्रतिजानीते शिखरिणीवृत्तेन पुराणैर्वसिष्ठशुकपराशरप्रभृतिभिः प्रोक्तंफलंयोगा

ग्रहाधीनायोगाःसदसदभिधानाजनिवतांततोयोगाधीनंफलमितिपुराणैःसमुदितम् ॥
अतोवक्ष्येयोगान्सकलगणकानंदजनकाञ्छुकास्यादुद्भूतंमतमिहविलोक्येहरुचिरम्॥१॥
ऋक्षेशःक्षीणवीर्यःसुतनवमगतोमानवोमन्युमान्वैराशीशेसांगनाथेरिपुनिधनगृहेप्रांत्यगेदु
र्बलःस्यात् ॥ धर्मद्वेष्याष्टनाथाःखलखचरयुताःस्थानकेक्वापिसंस्थास्तैर्दृष्टाःस्यात्तदा
नींपरपुरुषरतासुंदरीतस्यपुंसः ॥ २॥

धीनं अतःसकलगणकानंदजनकान् अशेषज्योतिर्विदांप्रीत्युत्पादकान्योगान्वक्ष्ये किंकृत्वाशुकास्यात् शुकमुनिमुखा दुद्भूतंरुचिरशोभनंमतंविलोक्यआलोच्य ॥१॥ अथानिष्टयोगानाह ऋक्षेशः जन्मराशिनाथः क्षीणबलः सन्त्रिकोणगत

श्चेन्मानवोजातःमन्युमान्क्रोधीस्यात् जन्मराशीशेसांगनाथेतनुपतिसहितेत्रिकस्थेदुर्बलःस्यात् यस्यनवमषष्ठाष्टमेशाः क्रूर ग्रहदृष्टियुक्ताः यत्रकुत्रापिस्थिताः यदितदानींतस्यभार्याजारगामिनीस्यात् ॥२॥ यस्यजन्मनिषष्ठाष्टमभवननाथौकुजवि धुयुतौचतुर्थस्थौस्यातांतदानींसनरः अन्यजातः जारजातः तथानवमषष्ठाधिनाथौयत्रकुत्रापिस्थितौक्रूरग्रहयुतौअथवा

मातृस्थानेस्थितौचेत्कुजविधुसहितौषष्ठरंध्राधिनाथौस्यातांयस्यप्रसूतौभवतिखलुनरस्त्वन्यजा
तस्तदानीम् ॥ क्वापिस्थानेस्थितौस्तःकलुषखगयुतौभाग्यरंध्राधिनाथौचेदेवंराहुणावातदनु
चशिखिनासंयुतावन्यजातः ॥ ३ ॥ युक्तौमंदेनशूद्रादथभवतिविदावैश्यतोभास्करेणक्षत्राज्जा
तःसितेनत्रिदशपगुरुणाभूमिदेवात्प्रसूतः ॥ दैत्येशेज्यौसपापौमदनरिपुधनस्थानगौचेत्परस्त्री
गामीव्योमारिपौस्तोगगनभवनगौतत्पितान्यारतःस्यात् ॥ ४ ॥

केवलेनराहुणाशिखिनावायुतौस्यातांतदान्यजातः कलुषखगयुतावित्यनेनराहुःकेतुरपिसर्वंक्रूरयोगेविवक्षितः अग्रिमश्लो केमंदादीनांपार्थक्येनयोगोपदेशात् कलुषखगयुतावित्यनेनैवसिद्धेराहुकेतुग्रहणंछंदोनुरोधात् ॥३॥ भाग्यषष्ठाधिनाथौमं

CC-0. In Public Domain. Digitization by eGangotri

देनयुक्तौशूद्राज्जातः उत्पन्नोभवति अथबुधयुक्तौवैश्याज्जातःभास्करेणयुतौचेत्क्षत्रियाज्जातःगुरुशुक्राभ्यांब्राह्मणाज्जातः बुधगुरुशुक्राणांकलुषखगयुतत्वेक्रूरैर्दृष्टत्वेतद्योगेननीचत्वेनास्तंगतत्वेक्रूरवर्गस्थत्वेनवासुधीभिर्बोध्यं अथशुक्रबृहस्पती सक्रूरौसप्तमषष्ठधनस्थानगतौचेत्तदापरस्त्रीगामीस्यात् दशमषष्ठाधिपौदशमस्थौतदातत्पिताजातस्यपिताअन्यरतःस्यात् परस्त्रीगामीस्यात् ॥४॥ क्रूरयुक्तोलग्नेशः द्वितीयस्थश्चेत्तत्पितासज्जनस्त्रीसंयुक्तः साधुजनस्त्रीगामीस्यात् सप्तमषष्ठद्वितीय

मूर्तीशःपापयुक्तोधनसदनगतश्चेत्तदासज्जनस्त्रीसंयुक्तस्तत्पितास्याद्बलविहग
युताःकामशत्रुस्वनाथाः ॥ कोशस्थास्तद्वदेवंफलमितिविविधंभ्रातृपत्न्यो
श्चपित्रोःस्थानेशाःक्वापिभावेतनुपतिसहिताश्चेत्पुमानन्यजातः ॥ ५ ॥

भावेशाः क्रूरयुताः द्वितीयस्थाश्चेत्तद्वदेवंफलंविविधमिति एवंप्रकारः विविधफलमितिज्ञेयं सज्जनस्त्रियामासक्तिर्दुराचारत्वं अभक्ष्यभक्षकत्वमित्यादिज्ञेयमितिभावः तृतीयसप्तमचतुर्थदशमेशास्तनुपतिसहितायत्रकुत्रापिस्थिताश्चेज्जातःपुमान्जारजातः ॥ ५ ॥

CC-0. In Public Domain. Digitization by eGangotri

लग्नेशबुधौकुजचंद्रौवाराहुकेत्वन्यतरयुतौवदाजातः श्वेतवर्णोपलक्षितकुष्ठरोगीभवति तदनुभौमशनियुक्तः आदित्यश्चेद्रक्त
वर्णनामककुष्ठवान्स्यात् सूर्ययुतोलग्नेशः त्रिकभवनस्थश्चेत्तदाजातस्यतापगंडस्तापगंडान्वितोगंडोरोगविशेषःस्यात् ॥६॥
चंद्रेणयुतोलग्नेशः त्रिकस्थश्चेज्जलजोगंडः स्यात् भौमयुतोलग्नेशस्त्रिकस्थश्चेत्तदाग्रंथिशस्त्रव्रणःस्यात् ग्रंथ्युपलक्षितःशस्त्रजो

लग्नाधीशेंदुपुत्रौक्षितितनयनिशानायकौवाऽपिसंस्थौयुक्तौस्वर्भानुनावाभवतिहिमनुजःकेतुना
श्वेतकुष्ठी ॥ आदित्योभौमयुक्तस्तदनुशनियुतोरक्तकृष्णाख्यकुष्ठीसार्कोलग्नाधिनाथोव्ययरि
पुनिधनस्थानगस्तापगंडः ॥ ६ ॥ ज्ञेयश्चंद्रेणगंडोजलजइहयुतोग्रंथिशस्त्रव्रणःस्याद्भूमीपुत्रेणपि
त्तंहिमकरतनयेनाथजीवेनरोगः ॥ आमोद्भूतस्ततश्चेद्भृगुतनययुतौनुःक्षयाख्योगदःस्याच्चौरोद्भू
तौत्यजाद्यायमशिखितमसामेकयुक्तन्वधीशः ॥ ७ ॥

व्रणः स्यादित्यर्थः बुधयुतोलग्नेशः त्रिकस्थःपित्तरोगःस्यात् जीवेनयुतोलग्नेशः त्रिकस्थश्चेत्तदा आमोद्भूतआमकोपजोरो
गःस्यात् शुक्रेणयुतस्तत्रस्थितोलग्नेशस्तदानुर्मनुष्यस्यक्षयाख्योरोगः यमशिखितमसामेकयुक्शनिराहुकेतूनांमध्येएकेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युक्तोलग्नेशः त्रिकस्थश्चेत्तदाचोरजोंत्यजाद्धुत्पन्नोवारोगःस्यात् रजकचर्मकारादयोंत्यजाः ॥ ७ ॥ कुजशनियुतश्चंद्रोमेषे वृषेवायदितदानरः श्वेतकुष्ठीस्यात् शुक्रभौमेंदुशनयः मीनराशिस्थायद्वाकर्कटवृश्चिकस्थाः तदानरः शरीरसौख्यरहितःम हापातकीरक्तकुष्ठीस्यात् गुरुःशुक्रोवाषष्ठभावाधिपक्रूरैर्दृष्टोलग्नस्थश्चेत्तदावक्रशोफीमुखाधिकरणकश्वयथुरोगयुतःस्यादि

चंद्रोमेषेवृषेवाकुजशशिसहितःश्वेतकुष्ठीसरोगोदैत्येज्यारेंदुमंदास्तिमिभवनगताःकर्कटालिस्थि
तावा ॥ अंगेसौख्येनहीनःपरमकलुषकृद्रक्तकुष्ठीनरःस्याद्वागीशोभार्गवोवायदिरिपुगृहपोमू
र्तिगःक्रूरखेटैः ॥ ८ ॥ दृष्टश्चेद्वक्रशोफीत्वथखलुसहितामीनकर्कालिभावाल्लूताकारश्चिरस्या
त्परमगदकरःकुष्ठएवंनराणाम् ॥ रिःफस्थानस्थितश्चेद्विबुधपतिगुरुर्गुप्तरोगीनितांतंभूमीमार्तं
डपुत्रौव्ययभवनगतौशत्रुगौवाव्रणीस्यात् ॥ ९ ॥

त्यग्रिमश्लोकेनसंबंधः ॥८॥ अथमीनकर्कवृश्चिकराश्युपलक्षिताभावाः क्रूरसहिताः यदितदानराणांएवंप्रकारेणचिरंकुष्ठं स्यात् तत्रप्रकारमाह यत्रलूताकारकः सविशेषःजंतुविशेषः उत्कृष्टगदविशेषकरः लूताकारकृत्कुष्ठःस्यादित्यर्थः गुरुर्व्यय

CC-0. In Public Domain. Digitization by eGangotri

स्थश्चेन्नरः गुह्यरोगीस्यात् यद्वावैद्याज्ञानरोगीस्यात् भौमशनोव्ययेषष्ठेवास्यातांतदाव्रणीव्रणयुतःस्यात् ॥ ९ ॥ क्रूरग्रह
युतौचंद्रशनीमेषमीनमकरवृश्चिकान्यतमराशिगतौनवमभवनगौचेन्मानवोजातःखंजःखंजाख्यपादरोगीस्यात् भूमिपुत्रः
सप्तमदृष्ट्यालग्नस्थंचंद्रंशनिंचपश्यतिचेत्तदानरः बुद्ध्याहीनःस्यात् इनविधुविवरेरविचंद्रयोर्मध्येभौमश्चेत्तथैवबुद्धिहीनःस्या

मेषमीनेकुलीरेतदनुचमकरेवृश्चिकेमंदचंद्रौस्यातांक्रूरान्वितौचेन्नवमभवनगौमानवःस्याच्चखं
जः ॥ लग्नस्थंपश्यतींदुंदिनमणितनयंभूमिजोद्यूनदृष्टोबुद्ध्याहीनोनरःस्यादिनविधुविवरेभू
मिजश्चेत्तथैव ॥ १० ॥ प्रालेयांशौतनुस्थेगगनसदनगेसाधिकारेर्कसूनौदृष्टेस्मिन्कामदृष्ट्या
हिमकिरणभुवाबुद्धियुङ्मानवःस्यात् ॥ पृथ्वीसूनुंमृगांकंतनुनिलयगतंपूर्णदृष्ट्येंदुसूनुःपश्येच्चे
द्बुद्धिहीनस्त्वथशशितनुपौभूभुवापीडितौवा ॥ ११ ॥

त् इनशब्दोलक्षणयादिनकरपरोज्ञेयः ॥१०॥ चंद्रेलग्नेसाधिकारेग्रहहोराद्रेष्काणादिवर्गाधिपत्यसहितेशनोदशमस्थेबुधेन
पूर्णदृष्टेस्मिन्मानवोजातः बुद्धिमान्स्यात् लग्नस्थंभौमंचंद्रंचपूर्णदृष्ट्याबुधः पश्यतिचेद्बुद्धिहीनःस्यात् यद्वाचंद्रलग्नेशौभौमेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्णदृष्ट्यापीडितौबुद्धिहीनःस्यात् ॥११॥ लग्नस्थेबुधेतदनुक्रूरग्रहदृष्टौअशुभग्रहदृष्टौशुभग्रहदृष्टिरहितौरविशनीएकराशौ अथवाएकभागेचक्रस्यपूर्वार्द्धेपरार्द्धेवाएकत्रगौषष्ठस्थौचेत्तदागतमतिर्नष्टमतिःस्यात् षष्ठभवननाथेसूर्येक्रूरग्रहयुतेतुर्यगेस तिहृद्रोगीस्यात् शनौगुरौवाषष्ठेशेक्रूरसहितेचतुर्थस्थेहृदिकृष्णपित्तरोगीस्यात् अथवादुष्टैःपीडितोहृदिसकंपःस्यात्॥१२॥

लग्नस्थेरौहिणेयेतदनुरविशनीक्रूरदृष्टौरिपुस्थावेकर्क्षेचैकभागेभवतिगतमतिर्दृष्टिहीनौशुभा
नाम् ॥ तिग्मांशौवैरिनाथेखलविहगयुतेतुर्यगेसूर्यसूनौहृद्रोगीवाक्पतौवाभवतिहृदिनरःकृ
ष्णपित्तीसकंपः ॥ १२ ॥ दुष्टैर्वापीडितःसन्नथकुजरविजौवाक्पतिर्बंधुसंस्थाहृद्रोगःस्यान्न
राणांव्रणइहनियतंक्लेशकारीशरीरे ॥ पातालस्थोमहीजस्तनयनिलयगाःसूर्यवित्सैंहिकेयो
रंध्रस्थोभानुपुत्रोयदिजनुषितदास्यान्नरोदुःखभागी ॥ १३ ॥

अथकुजःसूर्यजोगुरुश्चचतुर्थस्थायदितदाइहयोगेहृद्रोगाद्धेतोर्नराणांशरीरेक्लेशकारीव्रणःनियमेनस्यात् यदाजन्मसमयेभौ मःचतुर्थस्थःसूर्यबुधराहवःपंचमस्थाःशनिःअष्टमस्थः तदाजातोनरःदुःखभागीभवति ॥ १३ ॥

CC-0. In Public Domain. Digitization by eGangotri

स्वक्षेत्रस्थितोभौमोयदिलग्नंपश्येत्तदाजातःकातरः भीरुःस्यात् यदिशनिर्दशमस्थोरात्रौजन्मचेद्त्रापितद्वाच्यं कातरःस्या
दित्यर्थः लग्नगेभौमेस्वजनकलहकरःस्यात् स्वाधिकाराद्धीनेस्वगृहहोराद्रेष्काणादिसहितेसप्तमेभौमेवपुष्मान्दृढशरीरःअ
त्यंतयुद्धप्रीतिमान्तीक्ष्णस्वभावश्चस्यात् नूनंनिश्चयेन ॥१४॥ धरणिविधुसुतौभौमबुधौमिथः अन्योन्यंसप्तमदृष्ट्यापश्येतां

लग्नंपश्येन्निजर्क्षेयदिधरणिसुतःसंस्थितःकातरःस्याच्छायासूनुर्नभस्थोयदिनिशिजननंतद्वद
त्रापिवाच्यम् ॥ मूर्तौभूमीतनूजेस्वजनकलहकृद्यूनकेस्वाधिकाराद्धीनेभौमेवपुष्मान्परमयुधि
रतस्तीक्ष्णभावश्चनूनम् ॥ १४ ॥ पश्येतांकामदृष्ट्याधरणिविधुसुतौचेन्मिथःस्यात्तदानीमु
च्चाकारोथचंद्रंशनिरविमहिजाश्चेत्प्रपश्यंतिशीतः ॥ क्षीणेप्रालेयनाभौधरणिजसहितेपापभू
मिःखरःस्यान्मूर्तिस्थोद्यूनदृष्ट्याहिमकरतनयोवासवेज्यंप्रपश्येत् ॥ १५ ॥

तदानींजातः उच्चशरीरःस्यात् अथशनिरविभौमाश्चंद्रंपश्यंतितदाजातः शीतः शीतलस्वभावःस्यात् शीतलत्वंजडत्वंमूर्खत्व
मित्यर्थः क्षीणेचंद्रेभौमसहितेपापभूमिःपापकृत् खरस्तीक्ष्णभावःस्यात् मूर्तिस्थोबुधःसप्तमस्थंगुरुंपश्येत्तदाजातोहास्यासक्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इत्यग्रिमश्लोकेनसंबंधः ॥ १५ ॥ अथभौमसहितेबुधेशुभर्क्षेशुभग्रहराशौ यदाकुजज्ञौसूर्यदृष्टौमंदराशिस्थास्तदाराज्ञांविदु षांचरंजनेहर्षोन्मुखीकरणेप्रवीणःस्यात् त्रिकस्थश्चंद्रःशुक्रंपश्येत्तदाविस्मयालुर्विस्मययुक्तःस्यात् कुजबुधेंदवः बलिष्ठग्रह दृष्टाश्चेच्छीघ्रंयथास्यात्तथावचनस्फूर्तियुक्तःस्यात् ॥१६ ॥ शुक्रबुधौसप्तमाष्टमदशमगतौतदामानवःपुंश्चलोव्यभिचारीस्या

हास्यासक्तःसभौमेहिमकरतनयेस्याच्छुभर्क्षेकुजज्ञौमंदर्क्षेवार्कदृष्टौनरपतिविदुषांरंजनेकोविदः
स्यात् ॥ पश्येत्काव्यंसितांशुर्व्ययविलयरिपुस्थानगोविस्मयालुःक्षिप्रंवाक्स्फूर्तिमान्स्यात्कु
जबुधशशिनोवीर्यवत्खेटदृष्टाः ॥ १६ ॥ शुक्रज्ञौद्यूनयातौगगनविलयगौमानवःपुंश्चलःस्या
त्कामाज्ञामंदिरस्थौकविधरणिसुतौतद्वदाज्ञांबुयातौ ॥ काव्यारौतद्वदिंदोर्नभसिरविसुतादा
स्फुजिन्नीरयायीतद्वत्कामास्पदस्थाबुधसितशनयःस्वर्क्षगेभार्गवेहि ॥ १७ ॥

त् शुक्रभौमौसप्तमदशमस्थौ तद्वत् पुंश्चलःस्यात् शुक्रभौमौचतुर्थदशमगतौतद्वत्पुंश्चलःस्यात् चंद्राद्दशमःशनेश्चतुर्थःशुक्रस्त दातद्वत्पुंश्चलः शुक्रेस्वराशिस्थेशुक्रबुधशनयःसप्तमदशमस्थाः तदातद्वदित्यनुषंगः ॥ १७ ॥

CC-0. In Public Domain. Digitization by eGangotri

चंद्रात्शुक्राद्वाशनिस्तत्पुरोभागवर्त्तीतद्ग्रिमभावेस्थितः चंद्रसूर्यौलग्नस्थौशनिंपश्यतश्चेत्तदाजातः अयशाअपकीर्तिःस्यात्
अथसूर्ययुतेशनौभूमिकेंद्रेलग्नस्थेशुक्रचंद्रदृष्टेसतिदिवसपतेःसूर्यस्योपरागःशेफच्छेदोलिंगच्छेदस्तद्वदपकीर्तिःस्यात् ॥१८॥
शुक्रेवक्रग्रहराशिगतेसतिमानवोजातःसीमंतिन्यारतेःसंभोगाद्धेतोस्तोषदायीसुखदायीसुखदोनस्यात्   स्त्रीयालयस्थोल

प्रालेयांशात्सिताद्वादिनमणितनयस्तत्पुरोभागवर्त्तीमूर्त्तौचेच्चंद्रशुक्रौयदितरणिसुतंपश्यतश्चाय
शाःस्यात् ॥ शेफच्छेदोनराणामथतपनसुतेभूमिकेंद्रेर्कयुक्तेदृष्टेकाव्योडुपाभ्यांयदिदिवसपते
श्चोपरागोऽत्रतद्वत् ॥ १८ ॥ यातेवक्रग्रहर्क्षंजनुषिभृगुसुतेमानवस्तोषदायीसीमंतिन्यारतेःस्या
न्नखलुमदनगोभार्गवंलग्ननाथः ॥ पश्येत्स्त्रीयालयस्थोयदिरहसितदाकामिनीतोषदातान
स्यादेवंहिमांशुर्दिनकरसुतयुग्भौमतःखेसुखेवा ॥ १९ ॥

ग्ननाथःसप्तमगोभार्गवंयदिपश्येत्पूर्णदृष्ट्याइतिशेषः तदाजातः रहसिरतिस्थानेकामिनीतोषदातानस्यादेव द्वौनञौप्रकृता
र्थंगमयतइतिन्यायात् चंद्रःशनियुतोभौमाच्चतुर्थेदशमेवास्यात्तदाएवमुक्तप्रकारेणकामिनीतोषदातानस्यात् ॥ १९ ॥ ॥२५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमसुरगुरुः शुक्रो भौमयुक्ते ऽपलग्नात्षष्ठपः षष्ठभावाधिपस्तदा जातनराणां कामाधिक्यं कामप्रबलप्रचुरतां नियमेन जनयति सशुक्रः पापदृष्टश्चेत् विशेषात्कामाधिक्यं जनयति तदनु शुक्रे स्वभवनस्थे मिथुनस्थे वा मानवः कामवान्स्यात् सप्ताश्वपुत्रः शनिः धनुषि वृषे वा लग्ने चेत्तदा मानवोऽल्पकामः स्यात् ॥ २० ॥ शनौ मकरस्थे सति अल्पभाषी अप्रयोजनबहुभाषी भवति तदनु षष्ठभव

क्षोणीपुत्रेण युक्तः प्रथमसुरगुरुर्लग्नतः षष्ठपोयं कामाधिक्यं नराणां जनयति नियतं पापदृष्टो विशेषात् ॥ काव्ये स्वीयालयस्थे तदनु मिथुनगे कामवान्मानवः स्यान्मूर्तौ सप्ताश्वसूनौ धनुषि च वृषभे चेत्पुमानल्पकामः ॥ २० ॥ मंदेनक्रे ऽल्पभाषी त्वथ रिपुगृहपे वा सुधांशाव दृश्ये चेदर्द्धे संस्थिते को भवति जनिमतां नेत्रयोः क्रूरयुक्ते ॥ पश्येत्क्षीणं न चंद्रं यदि भृगुतनयः सूर्यजः पश्यतींदुं स्वर्क्षे चंद्रे नभस्स्थैर्यदि मदनगतैर्वीक्ष्यते पापखेटैः ॥ २१ ॥

ननाथे चंद्रे वा क्रूरयुते अदृश्यार्द्धे संस्थिते सति जनिमतां नेत्रयोः कश्चिद्व्रिशेषो भवति सप्तमभावभोग्यांशानारभ्याष्टमादिक्रमेण लग्नभुक्तांशपर्यंतमदृश्यार्धं ज्ञेयं यदि क्षीणं चंद्रं शुक्रो न पश्येत् शनिरिंदुं पश्यति कर्कस्थे चंद्रे दशमे सप्तमे वा स्थितैः क्रूरग्रहैर्दृष्टे तदा नूनं निश्चयेन स्वल्पनेत्रः स्यादित्यग्रिमपद्येनान्वयः ॥ २१ ॥

CC-0. In Public Domain. Digitization by eGangotri

तदनुलग्नस्थंभौमंचंद्रंवावाचस्पतिःशुक्रश्चपश्येच्चेन्मानवःकाणनेत्रःस्यात् तिग्मभानोःसूर्यात्पुरोभागगेअग्रगामिनि अस्ताभिलाषिभौमेनराणांदृग्विच्छायाकांतिरहितास्यात् सूर्याद्बुधेपुरोभागगेदृशिचिह्नंस्यात् अथभार्गवेशुक्रेलग्नस्थेदृष्टमेवाक्रूरदृष्टेसति अश्रुपाताद्धेतोर्नेत्रपीडास्यादित्यग्रिमश्लोकस्थेनसंबंधः॥२२॥ तदनुचंद्रभौमौएकभागैकनवांशस्थौतदानेत्रयोः

स्यान्नूनंचाल्पनेत्रस्तदनुतनुगतंभूमिजंवाक्षयेशंपश्येद्वाचस्पतिश्चेदसुरकुलगुरुःकाणदृङ्मानवः
स्यात् ॥ विच्छायातिग्मभानोःक्षितिभुविचपरोभागगेदृङ्नराणांसौम्येचिह्नंदृशिस्यादथव
पुषिलग्येभार्गवेक्रूरदृष्टे ॥ २२ ॥ नेत्रेपीडाश्रुपातात्तदनुशशिकुजावेकभावेयदाक्ष्णोश्चिह्नंकिं
चित्तदानींग्रहबलवशतोदृश्यमेवंसुधीभिः ॥ मार्तंडेरिःफयातेतदनुनवमगेपुत्रगेवाखलाढ्येदृ
ष्टेवास्यान्मनस्वीसुविकलनयनःसूर्यजेव्याधियुक्तः ॥ २३ ॥

किंचिच्चिह्नंस्यात् सुधीभिर्योगकर्तृग्रहबलवशात् एवमुक्तप्रकारेणादेश्यंवक्तव्यं तदनुक्रूरग्रहदृष्टेयुतेवासूर्येव्ययगेनवमेपंचमे सतिजातःसुविकलनेत्रःप्रशस्तनयनःस्यात् सूर्यजेशनौक्रूरयुतेदृष्टेद्वादशगेनवमपंचमगेव्याधियुक्तोरोगीस्यात् ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृष्ठोदयंराशिगंचंद्रंचतुर्थभावस्थःशनिःप्रपश्येत् लग्नपेमेषराशिस्थितेजातोमानवोवामनोह्रस्वकायःस्यात् जलचररा
शिस्थश्चंद्रोद्वितीयेथवाशनिनायुक्तेथवासूर्येलग्नगेयदिभवतितदादद्रुमान्कुष्ठयुक्तःपुरुषःस्यात् ॥ २४ ॥ षष्ठभावाधिपे
चंद्रेसौम्यदृष्टिसहितेकेवलंक्रूरैर्दृष्टेप्लीहपीडितःस्यात् एवंकामांगनाथेसप्तमनाथेलग्ननाथेवाचंद्रेकेवलंक्रूरदृष्टेप्लीहवान्स्यात्

चंद्रंपृष्ठोदयस्थंहिबुकगृहगतःसूर्यसूनुःप्रपश्येदित्थंलग्नाधिनाथेक्रियभवनगतेमानवोवामनः
स्यात् ॥ कोशेपीयूषभानुर्जलचरगृहगःसौरिणासंयुतोवामार्तंडेभूमिकेंद्रेयदिभवतितदाद
द्रुमान्पूरुषःस्यात् ॥ २४ ॥ दृष्टेक्रूरैर्नसौम्यैर्यदिरिपुगृहपेचोडुपेप्लीहवान्स्यादेवंकामांग
नाथेतदनुरविसुतस्तुर्यगोनष्टदृष्टिः ॥ प्लीहीस्याल्लग्ननाथोदिनकरतनयेक्रूरनिष्पीडितेचे
त्सौख्यायुङ्मानवःस्यात्तदनुसदनगेप्लीहवान्हर्षहीनः ॥ २५ ॥

पापग्रहैर्दृष्टःशनिश्चतुर्थश्चेन्नष्टदृष्टिरंधःस्यात् क्रूरग्रहैर्निष्पीडितेदृष्ट्यायोगेनवाविकलीकृतेयद्वावर्जितेलग्नेशेशनौसौख्या
युक्सौख्यरहितःस्यात् लग्नगतेशनौप्लीहवानानंदरहितश्चस्यात् ॥ २५ ॥

CC-0. In Public Domain. Digitization by eGangotri

 यदाक्रूराःकेंद्रगास्तदाजातोवपुषिशरीरेविकलोविकलांगःस्यात् पुष्पवंतौसूर्यचंद्रौकेंद्रगौवातदाविकलांगः अत्रपुष्पवंता
वित्युक्त्याचंद्रसूर्ययोरेकराशिस्थत्वंविवक्ष्यते चंद्रस्यक्षीणत्वाद्योगेस्यविकलइतिभावः लग्नस्थंशुक्रंशनिःपश्येत्तदाश्रोणिभा
गेकटितटेअंगहीनः शुक्रश्चतुर्थगोगुरुसहितःशनिर्भौमोबुधोवायत्रकुत्रस्थितस्तदाकटितटंहस्तेचरणेवाविकलःस्यात् ॥२६॥

॥२७॥

क्रूराःकेंद्रालयस्थावपुषिचविकलःकेंद्रगौपुष्पवंतौकिंवालग्नेप्रपश्येत्कविमिनतनयःश्रोणिभागें
गहीनः ॥ काव्यःपातालयायीसुरपतिगुरुणाक्वापियुक्तोर्कसूनुर्भौमोवारौहिणेयोभवतिहिवि
कलःश्रोणिभागेभुजेंघ्रौ ॥ २६ ॥ आयुःपुण्याधिनाथौयदिखलखचरात्तुर्यगौपापयुक्तौजंघावै
कल्यवान्स्यात्कुजशनिसहितेसैंहिकेयेचसूर्ये ॥ द्वेष्यस्थेतद्वदेवंशनिरिपुगृहपौरिःफयातौखलैश्च
दृष्टौतद्वत्तदानींरविविधुरविजावैरिरंध्रालयस्थाः ॥ २७ ॥

निधननवमेशौक्रूराच्चतुर्थगौक्रूरयुतौजंघावैकल्यवान्पंगूरुःस्यात् राहौभौमशनियुतेषष्ठगे चकाराद्भौमेशनियुतेसूर्येषष्ठग ॥२७॥
तेतद्वत्पंगुःस्यात् एवंशनिषष्ठभावेशौक्रूरदृष्टौव्ययस्थौतद्वत्पंगुःस्यात् सूर्यविधुशनयःषष्ठाष्टमभावस्थास्तदानींतस्यपंचशाखे
हस्तेआर्तिःपीडास्यादित्यग्रिमस्थेनसंबंधः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनुशुक्रयुतेदशमस्थेशनौक्लीबोनपुंसकःस्यात् शुक्राक्रांतराशेर्व्ययषष्ठगेशनौक्लीबरूपोरूपेणक्लीबसदृशः नतुक्लीबः सिंह राशिस्थचंद्रःसप्तमगंभौमंपश्येत्तदाकाणःस्यात् कर्कस्थःसूर्यःसप्तमगंभौमंपश्येत्तदाकाणः उभययोगेपिकाणःस्यात् यदि नवमपोमेषसिंहवृश्चिकमकरेस्यादितिसंबंधः ॥ २८ ॥ सूर्यचंद्रौओजर्क्षयुग्मराशौइत्याकृष्यान्वयः अन्योन्यंपरस्परंप

स्यादर्तिःपंचशाखेतदनुदशमगेसूर्यसूनौसिताढ्येक्लीबःस्यात्सूर्यसूनौव्ययरिपुगृहगेशुक्रतःक्ली बरूपः॥ पश्येत्सूर्यालयस्थोमदनभवनगंभूमिसूनुंसुधांशुश्चार्कःकाणश्चकर्केयदिशुभगृहपोमेष सिंहालिचक्रे ॥ २८ ॥ अन्योन्यंपश्यतश्चेत्तरणिहिमकरौतत्तनूजौमिथोवाभूसूनुःपश्यतीनं समभवनगतंत्वंगचंद्रौयदौजे ॥ ओजर्क्षेयुग्मराशौहिमकरशशिजौभूसुतेनेक्षितौचेत्पुंराशौलग्न शुक्रौतदनुहिमकरःक्लीबयोगाःषडेते ॥ २९ ॥

श्यतओजराशिगःसूर्यःसमराशिगंचंद्रंपश्यतितादृशश्चंद्रश्चसूर्यंपश्यति अयमेकोयोगः तत्तनुजौशनिबुधौओजसमराशि गौअन्योन्यंपश्यतः द्वितीयोयोगः समराशिगंसूर्यंभौमोविषमराशिगइत्यर्थात्सिद्धं भौमंचसूर्यः अन्योन्यंपश्यति इति तृतीयोयोगः लग्नचंद्रौविषमराशिगौभौमेन अर्थात्समराशिगेनदृष्टौ इतिचतुर्थोयोगः चंद्रबुधौक्रमेणविषमसमराशिगौ

भौमेनवीक्षितौ पंचमोयोगः लग्नशुक्रौचंद्रश्चपुंराशौपुरुषग्रहराशिनवांशेस्थिताविति षष्ठोयोगः एतेषट्क्लीबयोगाज्ञेयाः त
दुक्तंसारावल्यां अन्योन्यंरविचंद्रौविषमाविषमर्क्षगौनिरीक्षेते । इंदुजरविपुत्रौवातथैवनपुंसकंकुरुते ॥ वक्रोविषमगतोर्कंस
मगंचैवंपरस्परालोकात् । विषमर्क्षेलग्नेंदूसमराशिगतःकुजोविलोकयति ॥ शशिशशिजौसमविषमेभौमेननिरीक्षितौभवतः । ओ

आयुःस्थानोपयातेधरणिसुतयुतेभार्गवेवातकोपात्काव्येभौमेनयुक्तेकुजभ
वनगतेभूमिजामुष्कवृद्धिः ॥ भौमर्क्षेकाव्यचंद्रौसुरपतिगुरुणासूर्यजेना
थदृष्टौनूनंस्यान्मानवानांजनुषिकललजामुष्कवृद्धिर्नितांतम् ॥ ३० ॥

जनवांशकसंस्थालग्नेंदुसितास्तथैवोक्ताइति ॥ २९ ॥ भौमयुतेशुक्रेष्टमस्थेवातकोपान्मुष्कवृद्धिर्वृषणवृद्धिःस्यात् भौमरा ॥२८॥
शिगतेभौमयुतेशुक्रेभूमिसंसर्गाद्वातकोपजावृषणवृद्धिःस्यात् येषांमानवानांजन्मसमयेभौमराशिस्थौशुक्रचंद्रौगुरुशनिदृ
ष्टौतेषांकललजाकललदोषजावृषणवृद्धिरतिशयितास्यात् कललंशुक्रशोणितमिश्रीभावः ॥ ३० ॥

धनुषिवृषेमेषेवाविलग्नेक्रूरैर्दृष्टेविकृतदशनोदंतरोगीस्यात् पापलग्नेपापैर्युक्तंपापलग्नंतस्मिन् यथाप्रागुक्तयोगेनसांकर्यंस्यात् तस्मात्क्रूरग्रहयुक्तेधनुषिवृषेवालग्नेक्रूरदृष्टेखल्वाटोखलतिरोगीस्यात् नवमद्वितीयद्वादशपंचमस्थाःक्रूराश्चेत्तदाबंधभाक्पुरुषःस्यात् एवंमेषेधनुषिवृषेवालग्नेक्रूराक्रांतेनुःपुरुषस्यरश्मिबंधनंस्यात् ॥ ३१ ॥ शुक्रेशनिराशिस्थेजातोमानवोविग्रहेश

क्रूरैर्दृष्टेविलग्नेसुविकृतरदनश्चापगोमेषसंज्ञेखल्वाटःपापलग्नेधनुषिगवितथालोकितेक्रूरखेटैः ॥ धर्मार्थात्यात्मजस्थायदिखलखचराबंधभाक्पूरुषःस्यादेवंलग्नेक्रियेवाधनुषिगवितथारश्मिजंबंधनंनुः ॥३१॥ दुर्गंधिर्दानवेज्येशनिभवनगतेमानवोविग्रहेस्याद्द्वेष्याधीशेबुधर्क्षंतदनुमकरगेतद्वदत्राथकाव्ये ॥ केंद्रस्थेतेनयुक्तस्यादथकविरविजौस्वीयहद्दायुतौचेत्तद्वच्चंद्रेजयातेतनुसदनगतेचाननेस्याद्विगंधिः ॥ ३२ ॥

रीरेदुर्गंधिःस्यात् षष्ठाधिपेमिथुनकन्यामकरगेतद्वद्विग्रहेदुर्गंधिः अथकाव्येशुक्रेबुधर्क्षेतेनबुधेनयुक्तेकेंद्रगेसतितद्वद्विग्रहेदुर्गंधिः अथशुक्रशनीस्वीयहद्दायुतौस्वत्रिंशांशगौचेत्तद्वद्विग्रहेदुर्गंधिः अत्रच्छंदोनुरोधात्त्रिंशांशोहद्दाशब्देनोपलक्षितः मेषस्थेचंद्रेलग्नगतेदुर्गंधिःस्यात् ॥ ३२ ॥

CC-0. In Public Domain. Digitization by eGangotri

अथयोगाद्दशासुविचार्यैवकर्तव्यंइत्युपजातिकयाह ग्रहज्ञैर्ग्रहाणांदीप्तदीनादिज्ञानवद्भिः मानवानांजन्मनिशुभाशुभफलं सुमत्याग्रहलग्नज्ञानसंस्कृतयाबुद्ध्याविचार्यनिश्चयेनवक्तव्यं तथोक्तमृत्युलग्नेदशमेग्रहगणितेजातकमवलोक्यविशेषमपियः कथयतिशुभमशुभंवातस्यनमिथ्याभवेत् तथाचप्रदर्शितंनीलकंठदैवज्ञैः स्वोच्चेदीप्तःसमाख्यातोनीचेदीनःप्रकीर्तितः । मुदि

एवंग्रहाणांसदसत्फलानांयोगाद्ग्रहज्ञैरनुयोजनीयम् ॥ शुभाशुभंजन्मनिमानवानांफलंसुमत्याप्र विचार्यनूनम् ॥३३॥ हृद्यैःपद्यैर्गुंफितेसूरितोषेऽलंकाराख्येजातकेमंजुलेऽस्मिन् ॥ योगाध्यायः श्रीगणेशेनवर्यैर्वृत्तैर्युक्तोरामरामैःप्रणीतः ॥३४॥ इतिजातकालं०योगाध्यायस्तृतीयः ॥ ३ ॥

तोमित्रगेहस्थःस्वस्थश्चस्वगृहेग्रहः॥शत्रुगृहेस्मृतःसुप्तोजितोन्यैश्चनिपीडितः। नीचाभिमुखगोयस्तुग्रहः खिन्नस्तुसस्मृतः॥सुवीर्यःकथितःप्राज्ञैःस्वोच्चाभिमुखगोग्रहः । अधिवीर्योनिगदितःसुरश्मिःशुभवर्गगः ॥३३॥ अध्यायंसमापयति रामरामैस्त्रय स्त्रिंशद्भिः ॥ ३४ ॥ इतिजातकालंकारटीकायांयोगाध्यायस्तृतीयः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविषकन्यायोगः अथत्रिभिःपद्यैर्विशेषतोविषकन्यायोगानाह आश्लेषायांकृत्तिकायांतथाशततारकासुनक्षत्रेषुरविशनिभौमवारेषुभद्रासंज्ञकेतिथौद्वितीयासप्तमीद्वादशीसंज्ञेतिथौयाकन्याजननमियात् जन्मप्राप्नुयात्साविषाख्याविषकन्याभवति अत्रनक्षत्रवारतिथीनांप्रत्येकंद्वितीयोयोगः सयथा आश्लेषारविद्वितीयाप्रथमोयोगः कृत्तिकाशनिसप्तमीद्वितीयो

भौजंगेकृत्तिकायांशतभिषजितथासूर्यमंदारवारेभद्रासंज्ञेतिथौयाकिलजननमियात्साकुमारीविषाख्या॥ लग्नस्थौसौम्यखेटावशुभगगनगश्चैकआस्तेततोद्वौवैरिक्षेत्रानुयातौयदिजनुषितदासाकुमारीविषाख्या ॥ १ ॥

योगः शततारकाभौमद्वादशीतृतीयोयोगः एषुयोगेषुजाताकन्याविषाख्येत्यर्थः द्वौशुभग्रहौलग्नगौएकःपापोदशमस्थःद्वौपापौशत्रुमाश्रितौयदितत्रकन्याजायतेतदासाविषकन्याभवति ॥ १ ॥

अथक्रमेणापिनक्षत्रतिथिवारयोगानाह अथशनिवारेआश्लेषाद्वितीया तदनुकुजवारेशततारकासप्तमी दिनमणिदिवसेर
विवारेविशाखाद्वादशी एषुयोगेषुयस्याजन्मसाविषकन्याभवति यदिजन्मसमयेभौमशनिसूर्याःक्रमेणनवमलग्नपंचमस्थाः
तदाकुमारीसाविषकन्याभवति ॥ २ ॥ अथविषाख्यभंगमाह लग्नाचंद्राद्वामदनपतिःसप्तमपतिःशुभग्रहोवाद्यूनयायीसप्तम

मंदाश्लेषाद्वितीयायदितदनुकुजेसप्तमीवारुणर्क्षेद्वादश्यांचद्विदैवंदिनमणिदिवसेयज्जनिःसावि
षाख्या ॥ धर्मस्थोभूमिसूनुस्तनुसदनगतःसूर्यसूनुस्तदानींमार्तंडःसूनुयातोयदिजनिसमयेसा
कुमारीविषाख्या ॥ २ ॥ लग्नादिंदोःशुभोवायदिमदनपतिर्द्यूनयायीविषाख्यादोषंचैवानप
त्यंतदनुचनियतंहंतिवैधव्यदोषम् ॥ इत्थंज्ञेयंग्रहज्ञैःसुमतिभिरखिलंयोगजातंग्रहाणामार्यैरा
र्यानुमत्यामतमिहगदितंजातकेजातकानाम् ॥ ३ ॥

स्थःविषाख्यदोषंतत्प्रयुक्तमनपत्यंसंतानरहितत्वंवैधव्यदोषंचहंतिनाशयति एवमुक्तप्रकारेणइहास्मिन्जातकेआर्यानुमत्या
दैवज्ञसभ्यानुमतेनजातकानांगदितमखिलंयोगजातंज्ञेयं ग्रहाणांस्वभावविशेषाभिज्ञैरेवेदंयोगजातंप्रवक्तुंक्षममितिभावः। ३।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायंसमापयतिहृद्यैरित्यादिना ॥ ४ ॥ इतिजातकालंकारटीकायांविषकन्याध्यायश्चतुर्थः ॥ ४ ॥ अथायुर्दायाध्यायः ॥ १ ॥ लग्नाधीशोलग्नस्वामीकेंद्रयातैः लग्नचतुर्थसप्तमदशमस्थैः सुदीर्घमायुर्दद्यादित्यर्थः शुभग्रहैर्दृष्टः अतिवीर्यः अ

हृद्यैःपद्यैर्गुंफितेसूरितोषेऽलंकाराख्येजातकेमंजुलेऽस्मिन् ॥ कन्याध्यायःश्रीगणेशेनवर्यैर्वृत्तैर्युक्तोर्वाह्नसंख्यैर्विषाख्यः ॥ ४ ॥ इतिश्रीजातकालंकारेविषकन्याध्यायश्चतुर्थः ॥ ४ ॥ आयुर्मूलंजन्मिनांजीवनंचद्याजीवानांनिर्जराणांसुधेव ॥ एवंप्राहुःपूर्वमाचार्यवर्यास्तस्मादायुर्दायमेनंप्रवक्ष्ये ॥ १ ॥ लग्नाधीशोतिवीर्योयदिशुभविहगैरीक्षितःकेंद्रयातैर्दद्यादायुःसुदीर्घंगुणगणसहितंश्रीयुतंमानवानाम् ॥ सौम्याःकेंद्रालयस्थाजनुषिचरजनीनायकेस्वीयतुंगेवीर्याढ्येलग्ननाथेवपुषिचशरदांषष्टिमायुर्नराणाम् ॥ २ ॥

धिकतरबलस्तदाजातानांमानवानांसौम्याः बुधगुरुशुक्राः स्वक्षेत्रस्थाः चंद्रेस्वोच्चगेबलवतिलग्नेशेसति जातानांनराणां शरदांषष्टिरायुर्वर्षाणांषष्टिरायुःस्यात् ॥ २ ॥

लग्नाच्चंद्राद्वासौम्याःपूर्णचंद्रबुधगुरुशुक्राः केंद्रस्थास्तत्रापिगुरौलग्नगेतत्रदशमस्थैःक्रूरैर्दृष्टंयुक्तंयदिनभवतितदावत्सराणांस
प्ततिरायुःस्यात् शुभग्रहाः मूलत्रिकोणस्थाः गुरौस्वोच्चगेलग्नेशेबहुबलेसतिनराणांगगनवसुसंख्यंअशीतिवर्षोपलक्षितंआयुः
स्यात् एतेषुयोगेषुगुरुगणयुक्तमितिअनुषंगनीयम्॥३॥ सौम्येबुधेतिबलेकेंद्रस्थेसति अष्टमपदंखेटहीनंयदितदावर्षाणांत्रिंश

सौम्याःकेंद्रालयस्थावपुषिसुरगुरौलग्नतोवासुधांशोरायुर्युक्तंनदृष्टंनचगगनगतैःसप्ततिर्वत्सरा
णाम् ॥ यातामूलत्रिकोणेशुभगगनचराःस्वीयतुंगेसुरेज्येलग्नाधीशेतिवीर्येगगनवसुसमास्तु
ल्यमायुर्नराणाम् ॥ ३ ॥ सौम्येकेंद्रेतिवीर्येयदिनिधनपदंखेटहीनंसमाःस्युस्त्रिंशत्सौम्येक्षि
तश्चेद्गगनहिमकरैःसंयुतोथोस्वभेचेत् ॥ स्वत्र्यंशेचामरेज्येमुनिनयनमितंस्वर्क्षगोलग्नगोवाचंद्रे
द्यूनेशुभश्चेद्गगनरसमितंकोणगाःसौम्यखेटाः ॥ ४ ॥

दायुःस्यात् निधनंसौम्येक्षितंचेत्गगनहिमकरैर्दशभिःसंयुतः त्रिंशद्वर्षाणांचत्वारिंशदायुःस्यात् अथगुरौस्वराशौस्वद्रेष्काणे
सतिमुनिनयनमितंसप्तविंशद्वर्षाणिआयुःस्यात् चंद्रःस्वर्क्षगोलग्नगोवासप्तमेशुभग्रहश्चेत्तदागगनरसमितंषष्टिवर्षमितमायुः

CC-0. In Public Domain. Digitization by eGangotri

स्यात् शुभग्रहाः पंचमनवमस्थाः कर्कलग्नेसुरेज्योयदिभवतितदाखाष्टतुल्यंअशीतिवर्षतुल्यमायुःस्यादित्यग्रिमश्लोकेनान्वयः ॥४॥ अष्टमेशोनवमेभावेलग्नेशेक्रूरदृष्टेअष्टमगतेअब्धिहस्ताश्चतुर्विंशतिरायुःस्यात् लग्नाष्टमेशौअष्टमस्थौयदितदासप्तविंशतिवर्षाण्यायुः क्रूरसंयुतः गुरुः चंद्रदृष्टोयदिअन्यःकश्चिद्ग्रहः अष्टमस्थः तदाद्विपक्षाद्द्वाविंशतिरायुःस्यात्॥५॥लग्नचंद्रौ

कीटेलग्नेसुरेज्येयदिभवतितदाखाष्टतुल्यंलयेशोधर्मेगेचांगनाथेनिधनभवनगेक्रूरदृष्टेऽब्धिहस्ताः ॥ लग्नाधीशाष्टनाथौलयभवनगतौसप्तविंशद्विलग्नेक्रूरेज्यौचंद्रदृष्टौयदिनिधनगतःकश्चनास्तेद्विपक्षाः ॥ ५ ॥ लग्नेंदूक्रूरहीनौवपुषिसुरगुरौरंध्रभंखेटहीनंकेंद्रेसौम्येखशैलाः सितविबुधगुरूस्याच्छतंकेंद्रगौचेत् ॥ वागीशेकर्कलग्नेशतमिहभृगुजेकेंद्रगेथार्कसूनौधर्मागस्थेसुधांशौव्ययनवमगतेहायनानांशतंस्यात् ॥ ६ ॥

क्रूरग्रहयोगरहितौलग्नेअष्टमंग्रहरहितंकेंद्रेयदितदाखशैलाःसप्ततिः शुक्रबृहस्पतीकेंद्रगौचेत्शतंवर्षाणि गुरौकर्कलग्नेभृगुजेकेंद्रगेचशतंवर्षाणि एतेविशिष्टयोगाइत्यर्थः योगस्यवैशिष्ट्यंयशःसंपत्सूचकत्वमितिज्ञेयं अथशनौनवमलग्नस्थेवाचंद्रेव्ययनवमगतेवर्षाणांशतमायुःस्यात् ॥ ६ ॥

क्रूरग्रहाः पंचमकेंद्रनवमस्थाः नोभवेयुः धनुर्मीनेलग्नेकेंद्रेशुक्रेगुरौवानवमाष्टमंचशुभग्रहावलोकितंयदितदाशतंवर्षाण्यायुः स्यात् लग्नाच्चंद्राच्चग्रहाअष्टमस्थानस्युः शुक्रगुरुवलवंतौतदापूर्णायुः व्योमार्कवर्षायुःस्यात् शुभग्रहाः स्वराशिस्थाः वृषेलग्नेवाचंद्रेसतिवर्षाणांषष्टिरायुःस्यात् ॥७॥ कोदंडांत्यस्यार्धलग्नेधनुर्लग्नेद्वितीयहोरायांबुधेजिनांशैर्वृषस्थेअन्येसर्वेग्रहाः

धीकेंद्रायुर्नवस्थायदिखलखचरानोगुरोर्भेविलग्नेकेंद्रेकाव्येगुरौवाशुभमपिनिधनंसौम्यदृष्टंश तंस्यात् ॥ लग्नादिंदोर्नखेटायदिनिधनगतावीर्यभाजौसितेज्यौपूर्णायुःस्वीयराशौशुभगगन चराःषष्टिरंगोच्चगेऽब्जे ॥ ७ ॥ कोदंडांत्यार्धमंगंयदिसकलखगाःस्वोच्चगाश्चेजिनांशैर्गोस्थेपू र्णंचकेंद्रेसुरपतिभृगुजौलाभगेब्जेपरायुः ॥शुक्रेमीनेतनुस्थेनिधनगृहगतेसौम्यदृष्टेसुधांशौजी वेकेंद्रेशतंस्यादथतनुगृहपेछिद्रगेपुष्करेब्जे ॥८॥

स्वोच्चगाः तदापूर्णमायुःस्यात् गुरुशुक्रौकेंद्रेसतिलाभगेचंद्रेपरायुःपूर्णायुः शुक्रेमीनलग्नेसौम्यग्रहदृष्टेचंद्रेअष्टमस्थेगुरौकेंद्रे सतिवर्षाणांशतमायुः स्यात् अथतनुगृहपेइत्यग्रिमश्लोकेनान्वयः ॥ ८ ॥

लग्नपेष्टमस्थेचंद्रेदशमस्थेगुरौबलवति अन्येग्रहानवमभवनगाः तदाशतायुः कर्कलग्नेचंद्रजीवौ तृतीयषष्ठैकादशेशुभग्रहयु
क्तौशुक्रबुधौचकेंद्रेयदितदापिशतायुः शतायुरितिदेहलीदीपकन्यायेनोभयत्रान्वेति रविभौमशनयः गुरुनवमांशस्थाःकेंद्रे
स्युः लग्नस्थेगुरौ शेषाअष्टमरहितभावस्थाः तदानराणांशरगजतुलितंपंचाशीतिवर्षमितमायुःस्यात् ॥ ९ ॥ शुभग्रहनवां

वागीशेवीर्ययुक्तेनवमभवनगाःसर्वखेटाःशतायुःकर्कगेजीवचंद्रौसहजरिपुभवेसत्कविज्ञौचकें
द्रे ॥ केंद्रेसूर्यारमंदागुरुनवलवगावाक्पतौलग्नयातेव्यष्टस्थानेषुशेषाःशरगजतुलितंस्यान्नरा
णांतदायुः ॥ ९ ॥ क्रूराःसौम्यांशयाताउपचयगृहगाःकातराःकंटकस्थाःसौम्याव्योमार्कसं
ख्यायदितनुपकुजौरंध्रगौनोपरायुः ॥ केंद्रेलग्नेशजीवौनवसुतनिधनेकंटकेनोखलाख्याःसंपू
र्णपापखेटायदिगुरुजलगाजीवभावेचसौम्याः ॥ १० ॥

शस्थाःक्रूराउपचयस्थाः त्रिषड्दशमस्थाः कातराः भीरवः युद्धेपराजिताइतियावत् शुभग्रहाः कंटकस्थाः केंद्रस्थाः तदा
व्योमार्कसंख्यंविंशदधिकंशतंवर्षाणामायुःपरायुःस्यात् परायुर्योगेषुशनिकुजौअष्टमस्थौचेत्तदानोपरायुः परायुर्नभवतीत्य

र्थः लग्नेशगुरुकेंद्रस्थौक्रूरास्त्रिकोणाष्टमेकेंद्रवर्जिताश्चेत्तदापूर्णायुःस्यात् क्रूरग्रहाः गुरुजलगाः नवमचतुर्थगाःशुभाः जीवन वांशस्थाः यद्वासमराशिनवांशस्थाः संतः व्ययधनगृहगाः शुभाः पूर्णश्चंद्रः लग्नस्थः इहयोगेजातानांशतंवर्षाण्यायुःकथंभूतं इंदिरामंदिरंसंपदासहितमित्यग्रिमश्लोकपूर्वार्धेनसंबंधः ॥ १० ॥ शुभग्रहयुक्तेलग्नेशेलग्नेअन्यग्रहैर्नदृष्टेष्टमेशेऽष्टमगतेसति

युग्मर्क्षांशगतावाऽव्ययधनगृहगाश्चेच्छुभाःशीतभानुःसंपूर्णोलग्नगायीशतमिहजनितामिंदिरा
मंदिरंस्यात् ॥ लग्नेशेसौम्ययुक्तेवपुषिचलयपेरंध्रगेनान्यदृष्टेविंशत्केंद्रेलयेशेबलवियुजित
थालग्नपेत्रिंशदायुः ॥ ११ ॥ इंदावापोक्लिमस्थेतदनुतनुपतौनिर्बलेपापदृष्टेदंतैस्तुल्यंततो
र्कःखलखगविवरेलग्नगोब्जस्त्रिसंख्यम् ॥ रिःफेकेंद्रेसुरेज्येगुरुरिपुसहजेस्यात्सपापेंगनाथेरा
मान्दंकर्कलग्नेकुजतुहिनकरौकेंद्ररंध्रंग्रहोनम् ॥ १२ ॥

वर्षाणांविंशतिरायुःस्यात् अष्टमेशेलग्नेशेचकेंद्रस्थेबलरहितेचसतित्रिंशद्वर्षाण्यायुःस्यात् ॥ ११॥ चंद्रेआपोक्लिमस्थेतृतीय षष्ठनवमद्वादशगतेतनुपेलग्नेशेआपोक्लिमस्थेउभयेनिर्बलेक्रूरदृष्टेचसतिदंतैस्तुल्यंद्वात्रिंशद्वर्षाण्यायुःस्यात् क्रूरग्रहयोरंतरेलग्न

CC-0. In Public Domain. Digitization by eGangotri

गोर्कश्चेत्तदाऽब्जत्रिसंख्यंएकत्रिंशद्वर्षाण्यायुः गुरौद्वादशेकेंद्रेवासपापेलग्ननाथेनवमषष्ठतृतीयेसतिरामाब्दंत्रीणिवर्षाण्यायुः कर्कलग्नेचंद्रभौमकेंद्राणिअष्टमभवनंचग्रहरहितंयदितदारामाब्दंस्यादिति अग्रिमस्थेनान्वयः॥१२॥अष्टमेशेलग्नगतेअष्टम भवनंशुभग्रहरहितंखवेदाश्चत्वारिंशद्वर्षाण्यायुःस्यात् मकरस्थौशनिरवीतृतीयषष्ठगौअष्टमेशेकेंद्रगेपारावाराब्धिसंख्यंचतु

रामाब्दंस्याद्व्ययेशेवपुषिचनिधनंसौम्यहीनंखवेदाल्लग्नेशोरंध्रयातोवपुषिनिधनपःस्यान्नृणां बाणसंख्यम्॥नक्रेतिग्मांशुमंदौसहजरिपुगतौकंटकेरंध्रनाथेपारावाराब्धिसंख्यंतदनुशुभख गाःसद्धवर्क्षेऽत्रखाग्निः॥१३॥क्रूरैर्दृष्टेंगनाथेयदिशुभविहगावीर्यवंतःसुधांशौसंस्थेसौम्येगणेचे द्गुणमुनितुलितंरंध्रगैर्मध्यमायुः॥ स्याच्चंद्राद्दष्टपापैरथतपनसुतेद्व्यंगलग्नेहियातेरिःफेशेरंध्र नाथेयदिबलरहितेकंकपत्राक्षिसंख्यम्॥ १४ ॥

श्चत्वारिंशद्वर्षाण्यायुःस्यात् तदनुशुभग्रहाः सद्धवर्क्षेशुभग्रहनवांशेराशौवाऽत्रत्रिंशद्वर्षाण्यायुःस्यात्॥१३॥लग्नेशेक्रूरदृष्टेशुभ ग्रहाबलिनः चंद्रेशुभवर्गगेक्वापिभावेस्थितेसतिगुणमुनितुलितंत्रिसप्ततिवर्षतुल्यमायुःस्यात् चंद्रादष्टमगैःपापैःदिवाजन्मनि

CC-0. In Public Domain. Digitization by eGangotri

मध्यममायुःस्यात् अथशनौद्यंगेद्विस्वभावसंज्ञकेलग्नेस्थितेद्वादशभावनाथेअष्टमनाथेचबलहीनेसतिकंकपत्राक्षिसंख्यंपंचविंश
तिवर्षाण्यायुःस्यात् ॥ १४ ॥ सूर्येकर्कलग्नेक्रूरयुतेचंद्रेदशमगेगुरौकेंद्रस्थेशरविशिखमितंपंचाशद्वर्षमितमायुःस्यात् बुधेदशमेच
तुर्थगेवाचंद्रेव्ययेऽष्टमेलग्नेवाशुक्रगुरूएकराशिगौकापिस्थितौचेत्तदाव्योमबाणैःसमंपंचाशद्वर्षमितमायुःस्यात् लग्नेशयुक्तेचं

कर्कैगेसप्तसप्तौखलविहगयुतेपुष्करस्थेद्विजेशेकेंद्रयातेसुरेज्येशरविशिखमितंपुष्करेनीरगे
वा ॥ सौम्येपीयूषभानौव्ययनिधनगतेदेहगेवाकवीज्यावेकर्क्षेव्योमबाणैर्व्ययरिपुनिधने
लग्ननाथाढ्यचंद्रे ॥ १५ ॥ शन्यंशेलग्ननाथेभुजगशरमितंस्यादथोसौम्यखेटारंध्रोनादे
हनाथेव्ययरिपुनिधनेपापयुक्षष्टिरायुः ॥ राशीशोलग्ननाथोदिनमणिसहितोमृत्युगो
वाक्पतिश्चेन्नोकेंद्रेषष्टिरायुर्वपुषिदिनपतिःशत्रुभौमान्वितश्चेत् ॥ १६ ॥

द्रेद्वादशषष्ठाष्टमेलग्नेशेशन्यंशेशनिनवांशगेभुजगशरमितंअष्टपंचाशन्मितमायुःस्यादित्यग्रिमश्लोकेनान्वयः ॥ १५ ॥ शुभ
ग्रहाःअष्टमव्यतिरिक्तभावस्थाः लग्नेशः पापयुक्तःत्रिकस्थस्तदाषष्टिवर्षाण्यायुःस्यात् सूर्यसहितश्चंद्रराशीशः लग्नेशश्चमृत्यु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गः गुरुःकेंद्रगोनचेत्षष्टिवर्षाण्यायुःस्यात् निजशत्रुभौमाभ्यांयुक्तःसूर्योलग्नेगुरौबलहीनेचंद्रेव्ययपंचमस्थेखशैलाःसप्ततिवर्षाण्यायुःस्यादित्यग्रिमश्लोकेनान्वयः ॥१६॥ सर्वैः ग्रहैःक्रूरराशिस्थैःशुभैःशुभग्रहगतैः लग्नपतौसबलेपरायुःस्यात् सुतभवनगतैःसर्वैर्ग्रहैर्नराणांषष्टिवर्षाण्यायुःस्यात् ॥ १७ ॥ धनुर्धरराश्यंत्यनवांशेलग्नगेशुभैः प्रथमनवांशस्थैःकेंद्रगैर्वर्षाणांशत

वागीशेहीनवीर्येव्ययतनुजगतेयामिनीशेखशैलाधर्मेसर्वैःपरायुःखगखललवगैःकेंद्रयातैरशीतिः ॥ क्रूरैःक्रूरर्क्षयातैःशुभभवनगतैःसौम्यखेटैःसवीर्यैर्लग्नेशेस्यात्परायुःसुतभवनगतैःषष्टिरायुर्नराणाम् ॥ १७॥ सारंगस्यांत्यभागेयदिवपुषिगतेचाद्यभागेचकेंद्रेसौम्यैःखेटैःशतंस्याद्वसुसहजसुखेस्याच्चिरायुःसमस्तैः ॥ लग्नात्प्रालेयभानोर्निधनसदनपेरिःफकेंद्रेष्टविंशत्केंद्रेसौम्यग्रहोनेयदिमृतिभवनेकश्चिदास्तेखरामाः ॥ १८॥

मायुःस्यात् तृतीयचतुर्थाष्टमस्थैःसर्वैश्चिरायुर्दीर्घायुःस्यात् लग्नचंद्राच्चअष्टमेशेव्ययकेंद्रस्थेअष्टाविंशतिवर्षाण्यायुःस्यात् केंद्रेशुभग्रहरहितेअष्टमस्थश्चेत्कश्चिद्ग्रहस्तदाखरामास्त्रिंशद्वर्षाण्यायुःस्यात् ॥ १८ ॥

CC-0. In Public Domain. Digitization by eGangotri

चंद्रेक्षीणेसतिक्रूरग्रहोऽष्टमस्थः मृत्युभावेशः केंद्रस्थःलग्नेशोनिर्बलस्तदाखाश्विितुल्यंविंशतिवर्षाण्यायुःस्यात् शुभग्रहैः आपोक्लिमगतैः शनिचंद्रौषष्ठाष्टमस्थौतदाकामांकुशैर्नखैस्तुल्यंविंशतिवर्षाण्यायुःस्यात् अथेत्यग्रिमश्लोकेनाऽन्वयः ॥ १९ ॥ अथराहुचंद्ररहितौक्रूरग्रहौद्वितीयाष्टद्वादशगौतदाव्योमनेत्रप्रमाणांविंशतिसंख्यमायुः सूर्यशनीकेंद्रगौकुजोलग्नगस्तदापु

क्षीणेप्रालेयभानौयदिखलखचरोमृत्युगोमृत्युनाशःकेंद्रस्थोलग्ननाथोनिजबलरहितःखाश्वि
तुल्यंतदायुः॥ सौम्यैरापोक्लिमस्थैर्दिनमणिजविधूवैरिरंध्रालयस्थौतुल्यंकामांकुशैःस्यादथध
नमृतिगौरिःफगौपापखेटौ ॥ १९ ॥ हीनौस्वभानुनावायदिहिमहसाव्योमनेत्रप्रमाणंकेंद्र
स्थौसूर्यमंदौयदिवपुषिकुजःपुष्पबाणांकुशंस्यात ॥ शुक्रेज्यावंगयातौतनयभवनगौभौमपा
पावनायुर्जन्मेशःसार्कलग्नेखलशुभसहितश्चेक्षितःस्यादनायुः ॥ २० ॥

ष्पबाणांकुशांविंशद्वर्षाण्यायुःस्यात् शुक्रगुरुलग्नस्थौभौमपापौपंचमस्थौतदाअनायुः अल्पायुःस्यात् अर्कयुतोलग्नेशः जन्मराशिसंस्थितः अन्यैर्युतोदृष्टश्चेत्तदाऽनायुः अल्पायुःस्यात् ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जातकशास्त्रसमुद्रोत्तीर्णैः समस्तजातकशास्त्रज्ञादिभिरित्यर्थः पूर्वंयद्योगजमायुःप्रोक्तंप्रणीतंतस्मात्पूर्वोक्तात्सारभूतंदृढांशभूतंआयुर्यदेतदुक्तंतत्पुण्याचारश्लोकभाजांसदाचारोपलक्षितंधर्मयशोयुक्तानांनराणांघटतइत्यध्याहारः ॥ २१॥ अथादेशविधिरनुष्टुब्वृत्तेनाह बलाबलविवेकेनेति पुष्करालयशालिनांसूर्यादिग्रहाणांबलाबलविचारेणसुमनोभिरिदमायुःकथनीयं

यत्संप्रोक्तंयोगजंपूर्वमायुर्होरापारावारपारंगमज्ञैः ॥ तस्मादायुःसारभूतंयदेतत्पुण्याचार
श्लोकभाजांनराणाम् ॥ २१ ॥ बलाबलविवेकेनपुष्करालयशालिनाम् ॥ सुमनोभि
रिदंदेश्यमायुर्धर्मादिशालिनाम् ॥ २२ ॥ हृद्यैःपद्यैर्गुंफितेसूरितोषेऽलंकाराख्येजात
केमंजुलेऽस्मिन् ॥ आयुर्दायःश्रीगणेशेनवर्यैर्वृत्तैर्युक्तोबाहुपक्षैःप्रणीतः ॥ २३ ॥ इति
जातकालंकारेपंचमोऽध्यायः ॥ ५ ॥

धर्मादिशालिनांभवति पापकर्मिणांनभवतीतिअर्थात्सिद्धम् ॥२२॥ अध्यायंसमापयति हृद्यैःपद्यैरिति ॥ २३ ॥ इतिजातकालंकारटीकायांपंचमोऽध्यायः ॥ ५ ॥

CC-0. In Public Domain. Digitization by eGangotri

अथलग्नेशधनेशादीनांव्यत्ययात्फलान्याह लग्नेशेधनगेधनेशेलग्नगेसतिजातोधनवान्बुद्ध्याचारप्रवीणः बुद्ध्याचारेणच निपुणः उत्कृष्टपुण्यकृत्बलवान्भोगैकलीलश्चस्यात् लग्नेशेसहजेशेलग्नस्थेअल्पवीर्यःप्रशस्तबंधयुक्तःकुलजानांसुखदः मातृपक्षेणसहितश्चस्यात् ॥१॥ चतुर्थेलग्नेशेलग्नगेचतुर्थेशेजातः क्षमायुक्तःतताज्ञाराजकार्यप्रगुणमतियुतः पितुराज्ञायांराजका

लग्नाधीशेर्थगेचेद्धनभवनपतौलग्नयातेऽर्थवान्स्याद्बुद्ध्याचारप्रवीणःपरमसुकृतकृत्सारभृद्भोगशीलः ॥ भ्रातृस्थानेंगनाथेसहजभवनपेलग्नयातेल्पशक्तःसद्बंधूराजपूज्यःकुलजनसुखदोमातृपक्षेणयुक्तः ॥ १ ॥ तुर्येशेलग्नयातेतदनुतनुपतौतुर्यगेस्यात्क्षमावान्तताज्ञाराजकार्यप्रगुणमतियुतःसद्गुरुःस्वीयपक्षः ॥ लग्नस्थेसूनुनाथेतनुजपदगतेलग्ननाथेमनस्वीविद्यालंकारयुक्तोनिजकुलविदितोज्ञानवान्मानसक्तः ॥ २ ॥

र्येचक्रजुमतिःसन् प्रशस्तोगुरुर्यस्य यद्वासतोगुरुःस्वकीयपक्षेचस्थितःस्यात् पंचमेशेलग्नेशेपंचमस्थेसतिनरःप्रशस्तमनाः विद्ययाभूषितःस्वकुलेविख्यातोज्ञानवान्सदसद्वस्तुतः मानेअभिमानेसक्तः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

षष्ठेशेलग्नगेतदनुलग्नगेषष्ठेशेसतिनित्यंरोगरहितः अतएवशरीरेबलवान् द्रोहादौसक्तःआदिशब्देनपरानिष्टकरणादिज्ञेयं संग्रहपरः अतोद्रव्यवान्स्यात् लग्नेशेसप्तमस्थेसप्तमेशेलग्नस्थेसतितदामनुजःपितृभक्तः स्त्रीविषयेचंचलमनाः शालकस्यभार्याभ्रातुःकार्यकरःस्यात् ॥ ३ ॥ लग्नेशेष्टमगेऽष्टमेशेलग्नगेद्यूतव्यवहारेनिपुणः विक्रमवान्चौर्यादिसहितः आदिशब्देनवं

षष्ठेशेलग्नयातेतदनुतनुपतौषष्ठगेव्याधिहीनोनित्यंद्रोहादिसक्तोवपुषिसबलवान्द्रव्यवान्संग्रहीस्यात् ॥ मूर्तीशेकामयातेमदनसदनपेमूर्तिगेतातसेवीलोलस्त्रांतोंगनाथौभवतिहिमनुजः सेवकःशालकस्य ॥ ३ ॥ अंगेशेरंध्रयातेनिधनगृहपतावंगगेद्यूतबुद्धिःशूरश्चौर्यादिसक्तोनिधनपदमियाद्भूपतेर्लोकतोवा ॥ देहाधीशेशुभस्थेशुभभवनपतौदेहसंस्थेविदेशीधर्मासक्तोनितांतंसुरगुरुभजनेतत्परराजमान्यः ॥ ४ ॥

चनासुनिपुणः राजतोलोकतोवानिधनपदंमरणमाप्नुयात् लग्नेशेनवमस्थेनवमेशेलग्नस्थेसतिविदेशवासीनितांतंधर्मेरतः देवाराधनेगुरुसेवायांचतत्परः राजसत्कारभाजनश्चस्यात् ॥ ४ ॥

लग्नेशेकर्कस्थेकर्मनाथेलग्नगेभूपालः लाभेनतद्वत्सुरूपेणचविख्यातः गुरुसेवायांभीतिमान् लोलुपश्चंचलचित्तः द्रव्याणां स्वामीचस्यात् लाभेशेलग्नस्थेलग्नस्थेलाभपेशोभनकर्मादीर्घायुःक्षोणीनाथोराजा शुभविहगयुतःकोविदोधीरश्चमानवःस्यात् ॥५॥ लग्नेशेरिःफयातेव्ययनाथेलग्नगेसतिसर्वशत्रुः सर्वेषांजनानांशत्रुः सर्वेशत्रवोयस्येतिवा यतोनिरंतरंबुद्ध्याहीनः बु

कर्मस्थेलग्ननाथेगगनभवनपेलग्नगेभूपतिःस्यात्ख्यातोलाभेचरूपेगुरुभजनरतोलोलुपोद्रव्यनाथः ॥ लाभेशेलग्नयातेतनुभवनपतौलाभसंस्थेसुकर्मादीर्घायुःक्षोणिनाथःशुभविहगयुतोकोविदोमानवःस्यात् ॥ ५ ॥ लग्नेशेरिःफयातेव्ययसदनपतौलग्नगेसर्वशत्रुर्बुद्ध्याहीनोनितांतंकृपणतरमतिर्द्रव्यनाशीविलोलः ॥ इत्थंताताादिकानामपिजनुषितथाखेचराणांहियोगाद्वाच्यंहोरागमज्ञैस्तदनुतनुपयुग्भार्गवेराजपूज्यः ॥ ६ ॥

द्धिरहितः कृपणतरमतिः अतिशयवित्तहीनबुद्धिः अतश्चद्रव्यनाशी विलोलोनिर्विचारोशीघ्रकारीचस्यात् इत्थमुक्तप्रकारेणजातकजन्मसमयेताताादिकानामपिखेचराणांयोगात्फलंहोरागमज्ञैर्वक्तव्यं अयमर्थः जातकस्यजन्मलग्नाद्दशमंभवनंतातगृहंतदेवलग्नंप्रकल्प्यतदग्रिमान्क्रमात्क्रमेणधनादिभावान्परिकल्प्यतत्रलग्नभावेशयोर्व्यत्ययस्थितिमवलोक्य लग्नाधी

CC-0. In Public Domain. Digitization by eGangotri

शेर्थगेचेद्धनभवनपतौलग्नयातेर्थवान्स्यादित्यादिना उक्तोदाहरणेनतातादीनां अर्थवत्त्वादिफलंहोराशास्त्रज्ञैर्वाच्यं अथमं गलायशुभफलेआदेशंसमापयति तदनुतनुपयुगूभार्गवेलग्नेशयुक्तेशुक्रेत्रिकव्यतिरिक्तभावगईतिशेषात्तत्रजातोराजपूज्योभव ति राजपूज्यशब्देनवाञ्छितपदार्थानांसौलभ्यंध्वन्यते ॥६॥ एवमुक्तप्रकारेणमयागणेशेनस्वबुद्ध्याउदारंसारनिरूपणंमनो ज्ञंपदपदार्थरुचिरंसुफलप्रबोधंस्फुटफलजनकंदैवज्ञानांप्रमोदाय अनंतेशमितैर्दशाधिकशतप्रमितैर्वृत्तैः श्रीजातकालंकरणं

एवंस्वमत्यासुफलप्रबोधंश्रीजातकालंकरणंमनोज्ञम् ॥ वृत्तैरनंतेशमितैर्निबद्धं
मयामुदेदैवविदामुदारम् ॥ ७ ॥ पुष्करालयवशागुणसाराजातकोक्तिरमलेवम
राला ॥ संस्कृताविहरतांभवतांमेमानसेऽतिसरलेसुकवीनाम् ॥ ८ ॥

निबद्धंविरचितम् ॥७॥ अथस्वरचितग्रंथस्यकविमनोरुचिरत्वंप्रार्थ्यते मेममजातकोक्तिः भवतांपूज्यानांकवीनांअतिसरले मानसेनिर्मलामरालाहंसीवविहरतां कथंभूताजातकोक्तिः पुष्करालयवशापुष्करमाकाशस्तदेवालयंयेषांतेपुष्करालयाग्र हाः वेषांवशाधीनाशुभाशुभसूचकग्रहोपयोज्याइत्यर्थः हंसीपक्षेपुष्करजलंतस्यालयोमानसः तद्वशावद्वर्तिनीत्यर्थः गुणसारा

CC-0. In Public Domain. Digitization by eGangotri

जातकगुणानांसारोपदेशोर्थोयस्यांसा हंसीजलेगुणसाराहितगुणाद्वैर्थ्ययुक्ता राजहंसास्तुतेचंचुचरणैर्लोहितैःसिताइत्यभिधा नात् अमलाशुद्धादोषरहिताइत्यर्थः पक्षेऽमलानिर्मलेत्यर्थः संस्कृतामनोज्ञादिवाक्यपरिष्कृता हंसीपक्षेनिसर्गरुचिराइत्य र्थः॥८॥अथशालिन्याअध्यायंसमापयति हृद्यैःपद्यैरिति स्पष्टार्थः॥९॥इतिजातकालंकारेटीकायांषष्ठोध्यायः॥६॥अथवि

हृद्यैःपद्यैर्गुंफितेसूरितोषेऽलंकाराख्येजातकेमंजुलेऽस्मिन् ॥ भावाध्यायःश्रीगणेशेनवर्यैर्वृत्तैः षष्ठोष्टाभिरेषप्रणीतः ॥ ९ ॥ इतिजातकालंकारेषष्ठोऽध्यायः ॥ ६ ॥ अभूदवनिमंडलेगणकमं डलाखंडलः श्रुतिस्मृतिविहारभूर्विबुधमंडलीमंडनम् ॥ प्रचंडगुणगुर्जराधिपसभाप्रभातप्रभाक वींद्रकुलभूषणंजगतिकान्हजीकोविदः ॥ १ ॥

शिष्टंस्ववंशंसंख्यापयन्ग्रंथसमाप्तौदेशकालविशेषंप्रख्यापयति त्रिभिः पृथ्वीशार्दूलविक्रीडितैर्वृत्तैः अवनिमंडलेभारद्वाज कुलेनाम्नाकान्हजीकोविदः पंडितः अभूत् सकीदृशः जगतिलोकेगणकमंडलाखंडलोज्योतिर्विदामाचार्यः स्युरुत्तरपदेव्याघ्र पुंगवर्षभकुंजराः सिंहशार्दूलनागाद्याःपुंसिश्रेष्ठार्थगोचराइत्यभिधानात् श्रुतिस्मृतिविहारभूः श्रुतिस्मृतीनांप्रतिपादनद्वारा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विहारभूः प्रत्ययः विबुधमंडलीमंडनपंडितशोभादायकइत्यर्थः प्रचंडगुणगुर्जराधिपसभाप्रभातप्रभा प्रचंडारिपुविजयशाली नोविविधिगुणाः संभवग्रहादयोयस्यसगुर्जराधिपः गुर्जरदेशाधिपः तस्यसभायाः प्रभातप्रभेवप्रकाशकइत्यर्थः कवींद्रकुलभूषणं कविश्रेष्ठसंदोहस्यप्रभावहम् ॥१॥ तस्मात्कान्हजीकोविदात्परमंउत्कृष्टंसुतानांत्रयंबभूव तेषुज्यायान्ज्येष्ठः ग्रहज्ञतिलकः

भारद्वाजकुलंबभूवपरमंतस्मात्सुतानांत्रयंज्यायांस्तेष्वभवद्ग्रहज्ञतिलकःश्रीसूर्यदासःसुधीः ॥ श्रीमान्सर्वकलानिधिस्तदनुजोगोपालनामाभवच्छ्रीमद्दैवविदांवरस्तदनुजो श्रीरामकृष्णोऽभवत् ॥ २ ॥ शाकेमार्गणरामसायकधरा १५३५संख्येनभस्येतथामा सेब्रह्मपुरेसुजातकमिदंचक्रेगणेशःसुधीः ॥ छंदोलंकृतिकाव्यनाटककलाभिज्ञःशिवाध्यापकस्तत्रश्रीशिवविन्मुदेगणितभूर्गोपालसूनुःस्वयम् ॥ ३ ॥

गणकश्रेष्ठः सुधीः श्रीसूर्यदासः अभवत् तदनुजः तत्पश्चाज्जातः श्रीमान्वेदवित्सर्वकलानिधिः सर्वकलाकुशलः गोपाल नामाअभवत् तदनुजः श्रीमतांदैवज्ञानांचश्रेष्ठः श्रीरामकृष्णोऽभवत् ॥२॥ तत्रगोपालसूनुःगणेशःमार्गणरामसायकधरा संख्येशाकेपंचात्रिंशदधिकपंचदशशतमितेशाकेनभस्येभाद्रपदमासेब्रह्मपुरेसुजातकंशोभनंजातकंश्रीशिवाख्यविदः प्रमोदा

यच्चक्रेकृतवान् कथंभूतोगणेशः शिवाध्यापकः शिवोऽध्यापकउपाध्यायोयस्य छंदोलंकृत्यादिमान् छंदांसिमात्रावृत्तभेदा
ज्झिन्नानिवृत्तानि अलंकृतयउपमाद्यलंकाराः काव्यानिगद्यादिभेदेनद्विविधानि नाटकानिसंस्कृतप्राकृतभाषानिबद्धानि
कलाश्चित्रकर्माद्याः गणितभूर्गणिताश्रयः सिद्धांतविदित्यर्थः ॥ ३ ॥ ४ ॥ अध्यायंपूरयति हृद्यैःपद्यैरितिस्पष्टार्थः॥५॥

येपठिष्यंतिदैवज्ञास्तेषामायुःसुखेशिवम् ॥ भूयात्कैरवकुंदाभासुकीर्तिःसर्वतोदिशम् ॥ ४ ॥
हृद्यैःपद्यैर्गुंफितेसूरितोषेलंकाराख्येजातकेमंजुलेऽस्मिन् ॥ वंशाध्यायःश्रीगणेशेनवृत्तैर्युक्तो
वेदैःशैलसंख्यःप्रणीतः ॥ ५ ॥ ॥ इतिश्रीगणेशेनविरचितेजातकालंकारेसप्तमोऽध्यायः
समाप्तः ॥७॥ ॥छ॥ ॥ ॥छ॥ ॥ ॥छ॥ ॥ ॥छ॥

श्रीमच्छुक्लकुलेमहीयसिसदाशुक्लीकृतेजातकेआसीत्कृष्णदयाभरप्रमुदितःकृष्णोजयाद्यःकृती । तत्पुत्रेणविभावितातिरुचिरा
सज्जातकालंकृतिःश्रीरेषाहरभानुनामतिमतांमोदायभूयाच्चिरम् ॥ १ ॥ इतिश्रीमच्छुक्लोपनामकहरभानुभाविताजात
कालंकारटीकासमाप्ता ॥ श्रीकृष्णार्पणमस्तु ॥ शुभंभवतु ॥छ॥ ॥छ॥ ॥छ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं पुस्तकं मोहमय्याख्यनगर्यां भगीरथात्मजहरिप्रसादेन "गणपत कृष्णाजी" मुद्रणालये मुद्रापितं। एतत्पुस्तकस्य मुद्रणं अक्ष्यक्षिवस्विलामिते शाके १८२२ ज्येष्ठशुदि १५ समाप्तिमगमत्॥

पुस्तक मिलनेका ठिकाना.

हरिप्रसाद भगीरथजीका पुस्तकालय. कालकादेवीरोड़ रामवाड़ी मुंबई.

हनुमानदास ब्रजबल्लभका पुस्तकालय. चौक–कानपूर.

CC-0. In Public Domain. Digitization by eGangotri

॥ इति सटीकजातकालंकारः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri
Nepal-Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu